त्रैमासिक-सान्दर्भिक-पुनरीक्षितशोधपत्रिका
Quarterly Refereed and Reviewed Research Journal

**ISSN-2321-7626**
Vol. XXIV, Year VI
विक्रमाब्दः २०७६
ज्येष्ठ-श्रावणमासं यावत्
मई-जुलाई 2019

# पाणिनीया
# PĀṆINĪYĀ
## (Research Journal)

**महर्षिपाणिनिसंस्कृत-एवं-वैदिकविश्वविद्यालयः**
**देवासमार्गः, उज्जयिनी, मध्यप्रदेशः, भारतम्**
E-mail- utdpanini@gmail.com, Website - www.mpsvvujjain.org

संरक्षकः
**डॉ. पंकज लक्ष्मण जानी**
**कुलपतिः**

प्रधानसम्पादकः
**प्रो. (डॉ.) मनमोहन उपाध्यायः**
**उपकुलपतिः**

सम्पादकः
**डॉ. उपेन्द्रभार्गवः**

सहायकसम्पादकाः
**डॉ. तुलसीदासपरौहा**
**डॉ. पूजा उपाध्यायः**
**डॉ. शुभम् शर्मा**
**डॉ. अखिलेशकुमारद्विवेदी**
**डॉ. सङ्कल्पमिश्रः**

प्रकाशकः
कुलसचिवः
**महर्षिपाणिनिसंस्कृत-एवं-वैदिकविश्वविद्यालयः, उज्जयिनी (म.प्र.)**

**सदस्यताशुल्कम्**

| | |
|---|---|
| वार्षिकम् | - 500/- |
| त्रैवार्षिकम् | - 1500/- |
| मूल्यम् - प्रत्यङ्कम् | - 100/- डाकव्यय : 25/- |

# अनुक्रमणिका

सम्पादकीयम् V

**संस्कृतभागः**

१. पण्डितराजस्य काव्यचातुर्विध्यविमर्शः १
– डॉ. विजयकुमारपाण्डेयः

२. तृतीयाविभक्त्यर्थनिर्णयः – डॉ. पंकजकुमारव्यासः ११

३. वाच्यार्थव्यङ्ग्यार्थयोः परस्परम् आश्रयादिभेदे व्यञ्जनासिद्धिः
– डॉ. राजकुमारमिश्रः १८

४. व्याकरणनये वाक्यलक्षणपरिष्कारः – अमित शर्मा २३

५. व्याकरणस्य महत्वम् – सरला आर्या २७

६. नैषधमहाकाव्ये हर्षस्य पाण्डित्यम् – डॉ.शुकदेव वाजपेयी ३१

७. मिहिरोक्तस्य 'मत्स्यौ घटीति' पद्यस्य फलचिन्तनोपयोगः ३५
– डॉ. रामानन्दभट्टः एन्

८. शङ्करनारायणविरचिततन्त्रदर्पणाभिधानवार्षिकतन्त्रव्याख्याने चन्द्रशृङ्गोन्नतिविचारः – राधाकृष्ण बी. ४५

९. पुराणधर्मशास्त्रयोः मानवजीवने उपयोगिता – डॉ. मनोजकुमारद्विवेदी ५२

१०. भगवद्गीतायां भगवदुक्तविभूतीनां विस्तरः – दत्तात्रेयदीक्षितः ६२

११. काव्यशास्त्रीयप्रस्थानेषु आचार्यहेमचन्द्रमते काव्यदोषविचारः
– नम्रतापटेलः ७८

१२. शब्दोत्पत्ति विचारः – रमेशकुमारशुक्लः ८९

<u>हिन्दीभागः</u>

१३. वैदिक साहित्य में निहित शान्ति मूल्य – डॉ. प्रभाकर पाण्डेय ९३

१४. वेदाध्ययन में स्वरोच्चारण – डॉ. पीयूष त्रिपाठी ९८

१५. अथर्ववेदीय लोकसंस्कृति – आशीष कुमार १०२

१६. यज्ञ एवं पर्यावरण संरक्षण की वैदिक अवधारणा ११०
– ऋषि कान्त शर्मा

१७. ऐतिहासिक महाकाव्य में दोष विचार – डॉ. के.वी. सूर्यप्रकाश ११८

१८. बृहत्त्रयी का छन्दोविधान विमर्श – श्रेयस श्रीधर कोरान्ने १२७

१९. आधुनिक संस्कृत साहित्य में नारी चेतना (जानकीजीवनम् के सन्दर्भ में) – अंजुम आरा १३३

२०. ज्योतिषशास्त्र की दृष्टि से बन्ध्या एवं निःसंतति योग १३७
– विनीता नागर

२१. श्रीमद्भागवत में नारीपात्र देवहूति एक अनुशीलन १४१
– सुश्री वर्षा मण्डलोई

<u>आंग्लभागः</u>

22. Immediate effects of Agnihotra on perception and health issues- A pilot study 146
– Poonam Sharma (India)
– Diana Fernandez (De Cordoba, Manta)
– Katarzyna Masierek (Poland)

# सम्पादकीयम्

अयि सारस्वतसमाराधकाः ! संस्कृतशास्त्रपारम्पर्यरसिकाः !

महर्षिपाणिनिसंस्कृतवैदिकविश्वविद्यालस्य शोधाञ्चिता पत्रिकेऽयं पाणिनीया षष्ठे वर्षे चतुर्विंशतिसंख्यात्मकेन अङ्केन भवतां समक्षे प्रस्तूयते ।

पत्रिकेऽयं विश्वविद्यालयेऽस्मिन्नितरां शोधकार्यरतानां शोधार्थिनां गवेषणानुसन्धानप्रियाणाञ्च विदुषां सुहृदां मनोनुरञ्ज्येदिति धिया संस्कृत–हिन्दी–आङ्ग्लादिभाषाणां शोधपत्राणां सकलनं विधीय प्रकाश्यते । अत्र प्रकाशितलेखाः तत्तच्छास्त्रविचारविज्ञैः महता परिश्रमेण शास्त्राणामालोडनेन च रच्यन्तेऽति तेषामध्ययनेन स्पष्टमवलोक्यते।

व्याकरणन्यायमीमांसाज्योतिषालङ्कारादीनां शास्त्राणां साम्प्रतिकेन समयेन साम्यं कथं सिद्ध्यतीति सामयिकानां सान्दर्भिकलेखानां च प्रकाशनं परिकल्प्यतेऽस्माभिः । भारतीयमनीषानुगुणं 'मधुमती वाचमुदेयम्', 'जिह्वा मे मधुमत्तमा' स्वाध्यायान्नप्रमदितव्यमित्यादिभिर्बोधवाक्यैः पत्रिकेयं भवतां विदुषां बोधात्मकलेखानामाह्वानं च करोति ।

आशास्महे यत् विद्वान्सः निश्चयेन अस्माकं मार्गदर्शनं करिष्यन्तीति ।

विदुषां वशंवदः

**– डॉ. उपेन्द्रभार्गवः**

**पाणिनीया**
**ISSN-2321-7626**
Vol. XXIV, Year VI
विक्रमाब्दः २०७६
ज्येष्ठ-श्रावणमासाङ्कः
मई-जुलाई 2019

# पण्डितराजस्य काव्यचातुर्विध्यविमर्शः

**डॉ. विजयकुमारपाण्डेयः**

**सारांशः**

अस्माकं काव्यशास्त्रे विविधैः काव्यशास्त्रिभिः स्वकाव्यलक्षणसमन्वयाधारेण काव्यभेदाः स्वीकृताः सन्ति । आनन्दवर्धनाचार्यः काव्यं त्रिविधं स्वीकरोति ध्वनिगुणीभूत-व्यङ्ग्यचित्रभेदेन, यतोहि त्रिषु एव काव्येषु ध्वनिः क्रमशः प्रधानतया गुणीभावेन स्पर्शमात्रेण चावतिष्ठते । मम्मटस्य काव्यलक्षणं तादृशं वर्तते यत्र काव्यस्य उत्तममध्यमाधमाख्यं भेदत्रयं स्थातुं प्रभवति । तदनु चतुर्दशशताब्द्यां लब्धोद्भवस्य विश्वनाथस्य काव्यलक्षणं 'वाक्यं रसात्मकं काव्यम्' इत्यस्ति, अतो विश्वनाथस्य काव्यलक्षणानुसारं काव्यं द्विविधमेव उत्तमं मध्यमञ्चेति । विश्वनाथः अधमं काव्यं न स्वीकरोति यतोहि अधमे काव्ये सर्वथा रसाभावः । यदि विश्वनाथो रसमेव काव्यजीवातुतया विशदयति, तर्हि कथं स अरसे अधमे काव्ये काव्यत्वं स्वीकुर्यात् ? एतद्विपरीतं पण्डितराजो जगन्नाथो नैकतर्केण काव्यस्य चातुर्विध्यं प्रपञ्चयति । पण्डितराजदृशा समग्रोऽपि काव्यभेदप्रपञ्चश्शोधपत्रेऽस्मिन् निरूपयिष्यते ।

विप्रथते व्योम्नि प्रचण्डभास्कर इव संस्कृते चिन्तनाब्धिनिमज्जनानीतनैकसिद्धान्त-मणिः विद्वन्मणिः तर्ककर्कशमुखरितः पण्डितराजजगन्नाथः । महाकवेः महाकाव्यशास्त्रिणो-ऽस्य जगन्नाथस्य नैके ग्रन्था जेजीयन्ते, तेषु रसगङ्गाधरनामा सन्दर्भः केषां हि मतिमतां नो विदितः । काव्यशास्त्रग्रन्थेऽस्मिन् पण्डितराजः प्रतिपदं स्वं सिद्धान्तं सिद्धान्तानुगुणम् उदाहरणं च प्रणिनाय । 'रमणीयार्थप्रतिपादकः शब्दः काव्यम्' इति काव्यलक्षणम् उद्द्योतते पण्डितराजस्य । लक्षणघटितां 'रमणीयतां' सः चतुर्षु स्थानेषु निपुणं विलोकते, एतदर्थं पण्डितराजः काव्यस्य चतुरो भेदान् मन्यते उत्तमोत्तमोत्तममध्यमाधमसंज्ञकान् । पण्डितराजात् पूर्वं केषाञ्चन मम्मटादीनाम् आचार्याणां मते काव्यं त्रिविधं केषाञ्चन

---

साहित्यविभागाध्यक्षः, सम्पूर्णानन्दसंस्कृतविश्वविद्यालयः, वाराणसी

विश्वनाथादीनामाचार्याणां मते च काव्यं द्विविधमेव प्रपञ्चितमासीत्, किन्तु पण्डितराजो रसगङ्गाधरे स्वापारया प्रखरया प्रतिभया काव्यस्य चातुर्विध्यं यथा प्रपञ्चयति तथा अनेन शोधपत्रेण उपस्थापयिष्यते। पण्डितराजः सर्वप्रथमम् उत्तमोत्तमं काव्यं लक्षयन्नाह-

**शब्दार्थौ यत्र गुणीभावितात्मानौ कमप्यर्थमभिव्यङ्क्तस्तदाद्यम्॥**[१]

यत्र काव्ये शब्दो वाचकः अर्थो वाच्यश्च गुणीभावितात्मानौ अप्रधानीकृतात्मानौ अप्रधानीकृतस्वरूपौ वा कमपि चमत्कारवितरणगुणसामर्थ्यपूर्णं सहृदयहृदयोल्लासकरम् अर्थम् अभिव्यङ्क्तः अभिव्यक्तं वा कुरुतः तदा आद्यम् उत्तमोत्तमं काव्यं भवतीति लक्षणसारः। पण्डितराजस्य लक्षणमिदम् आनन्दवर्धनाचार्यस्य ध्वनिलक्षणेन अत्यन्तं साम्यमावहति-

**यत्रार्थः शब्दो वा तमर्थमुपसर्जनीकृतस्वार्थौ।**
**व्यङ्क्तः काव्यविशेषः स ध्वनिरिति सूरिभिः कथितः॥**[२]

पण्डितराजस्य लक्षणोपात्तं 'कमपि' इति पदं 'चमत्कारभूमि'मिति अर्थपरं वर्तते, एतेन अतिगूढव्यङ्ग्यसत्तावत्तः काव्यस्य स्फुटव्यङ्गसत्तावत्तः काव्यस्य च निरासो बोध्यः, यतोहि अतिगूढे व्यङ्ग्ये स्फुटे च व्यङ्ग्ये चमत्कारो न भवति, तर्हि किमाकारो व्यङ्ग्यः चमत्कारोत्पादको भवति ? इति प्रसङ्गे केनचित् सहृदयेन यथा प्रोक्तम्-

**नान्ध्रीपयोधर इवातितरां प्रकाशः**
**नो गुर्जरीस्तन इवातितरां निगूढः।**
**अर्थो गिरामपिहितः पिहितश्च कश्चित्**
**सौभाग्यमेति मरहट्टवधूकुचाभः॥**[३]

तथैवाशयं पण्डितराजोऽपि सदये हृदये अनुभजमानः 'कमपि' पदं संवृत्तिवक्रतया 'चमत्कारभूमि'मिति विवृतौ विवृणोति। लक्षणे 'गुणीभावितात्मानौ' इत्यनेन स्वापेक्षया वाचकवाच्यापेक्षया वा व्यङ्ग्यप्राधान्याभिप्रायकमिति ज्ञेयम्। लक्षणे यदि 'गुणीभावितात्मानौ' इत्यस्य निवेशो न स्यात् तर्हि मध्यमकाव्यस्य वाच्यसिद्ध्यङ्गभेदस्य प्रसङ्गो उत्पद्येत, तस्माद् 'गुणीभावितात्मानौ' इति पदस्य निवेशो युक्तियुक्त एव।

इदानीं पण्डितराजानुसारम् उदाहरणमवतार्यते-

**शयिता सविधेऽप्यनीश्वरा सफलीकर्तुमहो मनोरथान्।**
**दयिता दयिताननाम्बुजं दरमीलन्नयना निरीक्षते॥**[४]

अत्रालम्बनस्य नायकस्य, सविधशयनेन आक्षिप्तस्य रहःस्थानादेः उद्दीपनस्य च विभावस्य, तादृशनिरीक्षणादेरनुभावस्य, त्रपौत्सुक्यादेश्च, व्यभिचारिणः संयोगाद् रतिर्व्यज्यते तस्मात् शृङ्गारो रसः।

तदनु पण्डितराजः काव्यस्य द्वितीयं भेदम् उत्तमम् इति संज्ञकं निरूपयति, यथा-

**यत्र व्यङ्ग्यमप्रधानमेव सच्चमत्कारकारणं तद् द्वितीयम्॥**[५]

यत्र व्यङ्ग्यम् अप्रधानीभवदेव वाच्यचमत्कारकारणं भवति तत् काव्यं द्वितीयम् इति फलितार्थः।

अत्र लक्षणे 'एव'कारोऽवधारणार्थकः, अन्ययोगव्यवच्छेदी च वर्तते। यदि एवशब्दस्य निवेशो न स्यात् अर्थात् काव्यलक्षणं 'यत्र व्यङ्ग्यमप्रधानं सच्चमत्कारकारणं तद् द्वितीयम्' इत्येव स्यात् तर्हि–

**अयं स रसनोत्कर्षी पीनस्तनविमर्दनः।**

**नाभ्यूरुजघनस्पर्शी नीवीविस्त्रंसनः करः।।**[६]

इत्यादिषु अपराङ्गव्यङ्ग्योदाहरणेषु शृङ्गाररूपव्यङ्ग्यस्य वाच्यापेक्षया प्राधान्येऽपि प्रधानीभूतव्यङ्ग्यकरुणरसापेक्षया अप्राधान्यात् लक्षणसमन्वयेन अतिव्याप्तिः स्यात्। तद्दशायाम् 'अयं स रसनोत्कर्षी' इत्युदाहरणे ध्वनित्वमेव, यतोहि अत्र व्यजमानः शृङ्गारः करुणमेवोपकरोति अतः प्रधानकरुणरसदृष्ट्या काव्यमिदं ध्वनिसंज्ञकम्, अप्रधानशृङ्गारदृष्ट्या मध्यमं च। अत एकस्मिन्नेव काव्ये व्यङ्ग्यस्य प्राधान्याप्राधान्याभ्यां ध्वनिकाव्यस्य मध्यमकाव्यस्य च सहस्थितिर्नोत्पद्येत इति धिया पण्डितराजेन द्वितीयकाव्यभेदलक्षणे 'एव' पदं सन्निविष्टं, येन एतत्काव्यगः कोऽपि व्यङ्ग्यो वाच्यापेक्षया प्रधानो व्यङ्ग्यान्तरापेक्षया च अप्रधानो न स्यात् प्रत्युत सर्वथैव अप्रधानः स्यात्। द्वितीयकाव्यभेदे प्रायेण एक एव व्यङ्ग्यः स्यात् स च वाच्ये स्वोपस्थित्या चमत्कारकः स्यात्। यदि द्वितीये काव्यभेदे अनेके व्यङ्ग्याः स्युः तर्हि अस्यामपि स्थितौ समेऽपि व्यङ्ग्या वाच्ये स्वोपस्थित्या चमत्कारं कुर्युः, एतेनापि द्वितीयकाव्यभेदोऽक्षत एव। इदानीं लक्षणानुकूलम् उदाहरणम् उपन्यस्यते–

**राघवविरहज्वालासन्तापितसह्यशैलशिखरेषु।**

**शिशिरे सुखं शयानाः कपयः कुप्यन्ति पवनतनयाय।।**[७]

अत्र 'जानकीकुशलावेदनेन राघवः शिशिरीकृतः' इति व्यङ्ग्यमाकस्मिक–कपिकर्तृकहनुमद्विषयककोपोपपादकतया गुणीभूतमपि, दुर्दैववशतो दास्यमनुभवद् राजकलत्रमिव कामपि कमनीयतामावहति। इत्थम् आद्ययोः काव्ययोः लक्षणपूर्वकमुदाहरणं प्रदर्श्य सङ्गमय्य चेदानीं तृतीयं काव्यभेदं मध्यमाख्यम् अवतार्यते–

**यत्र व्यङ्ग्यचमत्कारासमानाधिकरणो वाच्यचमत्कारस्तत्तृतीयम्।**[८]

लक्षणस्य भावोऽयं यद् यत्र व्यङ्ग्यस्य चमत्कारो लघ्वंशे अल्पांशे वा स्याद् वाच्यस्य च चमत्कारो बृहदंशे बृहत्परिमाणे वा स्यात् तत्र मध्यमं काव्यमिति ज्ञेयम्। इदानीं पण्डितराजलक्षणसम्मतम् उदाहरणं समुपन्यस्यते–

**तनयमैनाकगवेषणलम्बीकृतजलधिजठरप्रविष्टहिमगिरिभुजायमानाया भगवत्या भागीरथ्याः सखी।।**[९]

अत्रोत्प्रेक्षा वाच्यैव चमत्कृतिहेतुः। श्वैत्यपालालतलचुम्बित्वादीनां चमत्कारो लेशतया सन्नप्युत्प्रेक्षाचमत्कृतिजठरनिलीनो नागरिकेतरनायिकाकल्पितकाश्मीर-द्रवाङ्गरागनिगीर्णो निजाङ्गगौरिमेव प्रतीयते।

**उत्तममध्यमकाव्ययोर्विद्यमानस्य व्यङ्ग्यस्य स्थितौ भेदः**

उत्तमे काव्येऽपि व्यङ्ग्यो गूणीभूतो भवति मध्यमे काव्येऽपि व्यङ्ग्यो गुणीभूत एव, तर्हि कथं पृथक् पृथङ्नामवत् काव्यम् ? इति काचित् संशीतिरुदेति मानसे । अतः परिस्थितिमेनामालक्ष्य पण्डितराजः समाधत्ते-

**अनयोरेव द्वितीयतृतीयभेदयोर्जागरूकाजागरूकगुणीभूतव्यङ्ग्ययोः प्रविष्टं निखिलमलङ्काप्रधानं काव्यम् ।**[१०]

पण्डितराजस्य आशयोऽयं यद् उत्तमे काव्ये अर्थाद् द्वितीये काव्ये व्यङ्ग्यो जागरूकतया तिष्ठति अर्थाद् वाच्यचमत्कारवर्धनाय व्यङ्ग्यस्य सहयोगो द्वितीयकाव्यभेदे आवश्यको भवति, किन्तु तृतीये मध्यमाख्यकाव्यभेदे व्यङ्ग्यो वाच्यचमत्कृतये कथमपि नावश्यकः । यद्यपि तृतीयेऽपि भेदे व्यङ्ग्यो भवति किन्तु स व्यङ्ग्योऽल्पदेशप्रसरो भवति अतः केवलेन वाच्यचमत्कृतेः कारणेनैव मध्यमकाव्यव्यवहारः प्रवर्तते । इत्थं काव्यस्य भेदत्रयं प्रतिपाद्य इदानीं चतुर्थम् अधमं काव्यं निरूपयितुमवसरोऽतः प्रपञ्च्यते-

**यत्रार्थचमत्कृत्युपस्कृता शब्दचमत्कृतिः प्रधानं तदधमं चतुर्थम् ।**[११]

अर्थाद् वाच्यार्थप्रीतिजन्यचमत्कारपोषितस्य शब्दप्रतीतिजन्यचमत्कारस्य प्राधान्यम् तद् अधमं चतुर्थं काव्यमिति । यद्यपि अत्रापि व्यङ्ग्यलेशो भवति किन्तु स व्यङ्ग्यः कुतश्चित् प्रादुर्भवन्नपि कवेरविवक्षितो भवतीति विशेषः । इदानीं लक्षणानुगुणम् उदाहरणं प्रस्तूयते-

**मित्रात्रिपुत्रनेत्राय त्रयीशात्रवशत्रवे ।**
**गोत्रारिगोत्रजत्राय गोत्रात्रे ते नमो नमः ।।**[१२]

मित्रः सूर्यो अत्रिपुत्रश्च चन्द्रः इमौ नेत्रे यस्य, तस्मै, त्रय्याः ऋग्यजुस्सामवेदानां शात्रवस्यापहारकतया रिपोर्हयग्रीवदैत्यस्य शत्रवे नाशकाय, गोत्राणां पर्वतानां पक्षच्छेदनाद् अरेः इन्द्रस्य गोत्रजान् वंश्यान् देवांस्त्रायते रक्षतीति तथाभूताय, गोः पृथिव्याः गवां धेनूनां वा त्रात्रे रक्षकाय, ते विष्णवे नमः, इत्यर्थो वर्तते उदाहरणस्य । अत्र विष्णुपरकार्थबोधात् परं शिवपरकोऽर्थोऽपि चिन्त्यते सहृदयैः ।

प्रकृते पण्डितराजस्य आशयोऽयमत्र यद् अत्र शब्दचमत्कृतौ अर्थचमत्कृतिर्लीना वर्तते । अत्र अर्थचमत्कारः किञ्चिन्मात्रं वर्तते । अत्र अर्थचमत्कृतौ कवेः संरम्भो मनागपि न प्रतीयते केवलायां शब्दचमत्कृतावेव कवेः संरम्भः । कविना अत्र अनुप्रासच्छटाप्रसारकः शब्दगणो गुम्फितः अतः स्पष्टमेव कवेः संरम्भः शब्दालङ्कारप्रतिपादने, न चार्थप्रतिपादने इति

बोध्यम् ।

**अधमाधमकाव्यावसरः तत्खण्डनम् च –**

यद्यपि एवंप्रकारेण काव्यव्यवस्थायां पञ्चमकाव्यस्य 'अधमाधमस्य' कृतेऽपि स्थितिः उत्पद्यते यतोहि चतुर्थे काव्ये कथञ्चिद् अनुभूयमानायाः अर्थचमत्कृतेः सत्ता तु अस्त्येव किन्तु सा सत्ता शब्दचमत्कृतौ लीना जायते अतः अधमकाव्यव्यवस्था । किन्तु यत्र मनागपि अर्थचमत्कृतिर्न स्यात् केवला शब्दचमत्कृतिरेव स्यात् तत्र 'अधमाधमः' इति पञ्चमोऽपि कश्चन काव्यप्रकारो भवितुमर्हतीति आपातत उत्पन्नां सम्भावनां निराकुर्वता पण्डितराजेन अवेदि–

**यद्यपि यत्रार्थचमत्कृतिसामान्यशून्या शब्दचमत्कृतिस्तत् पञ्चममधमाधम-मपि काव्यविधासु गणयितुमुचितम् । यथैकाक्षरपद्यार्धावृत्तियमकपद्यबन्धादि ।**

तथापि रमणीयार्थप्रतिपादकशब्दतारूपकाव्यसामान्यलक्षणानाक्रान्ततया वस्तुतः काव्यत्वाभावेन, महाकविभिः प्राचीनपरम्परामनुरुन्धानैस्तत्र तत्र काव्येषु निबद्धमपि नास्माभिर्गणितम्, वस्तुस्थितेरेवानुरोध्यत्वात् ।[१३]

**पादटिप्पणयः–**

१. रसगङ्गाधरः, प्रथमाननम्, पृ.सं.३७
२. ध्वन्यालोकः, प्रथमोद्योतः, का.सं.१३
३. काव्यप्रकाशः, पृ.सं.१९८
४. रसगङ्गाधरः, प्रथमाननम्, पृ.सं.३८
५. रसगङ्गाधरः, प्रथमाननम्, पृ.सं.६६
६. काव्यप्रकाशः, पं.उ. उदा.सं.११६
७. रसगङ्गाधरः, प्रथमाननम्, पृ.सं.६९
८. रसगङ्गाधरः, प्रथमाननम्, पृ.सं.७६
९. रसगङ्गाधरः, प्रथमाननम्, पृ.सं.७६
१०. रसगङ्गाधरः, प्रथमाननम्, पृ.सं.७८
११. रसगङ्गाधरः, प्रथमाननम्, पृ.सं.७८
१२. रसगङ्गाधरः, प्रथमाननम्, पृ.सं.७९
१३. रसगङ्गाधरः, प्रथमाननम्, पृ.सं.८०

**सन्दर्भग्रन्थसूची–**

काव्यप्रकाशः, विश्वेश्वरटीका, ज्ञानमण्डललिमिटेड वाराणसी, संस्करणं १९९८
रसगङ्गाधरः, चन्द्रिका टीका, चौखम्बा सुरभारती प्रकाशनम्,नवमं संस्करणम् २००१
ध्वन्यालोकः, तारावती टीका, मोतीलाल बनारसीलाल, द्वितीयसंस्करणम् १९७३

पाणिनीया
ISSN-2321-7626
Vol. XXIV, Year VI
विक्रमाब्दः २०७६
ज्येष्ठ-श्रावणमासाङ्कः
मई-जुलाई 2019

# तृतीयाविभक्त्यर्थनिर्णयः

**डॉ. पंकजकुमारव्यासः**

तत्र वैयाकरणभूषणसारे श्रीमता कौण्डभट्टेन 'आश्रयोऽवधिरुद्देश्यः सम्बन्धः शक्तिरेव वा'[१] इत्यादिकारिकया द्वितीयातृतीयासप्तमीनामाश्रयोऽर्थ इति प्रतिज्ञातम् । तत्र तृतीयाया भेदद्वयम्, कर्तरि करणे च तद्विधानात् । उभयोरपि आश्रयोऽर्थ इति प्रकृतप्रबन्धे यथाग्रन्थं प्रतिपाद्यते ।

**कर्तृतृतीयाया आश्रयार्थकत्वव्यवस्थापनम् -**

**अत्र प्रश्नः - 'कर्तृकरणयोस्तृतीया'** (पा.सू. २-३-१८) इति पाणिन्यनुशासनेन कर्तरि वाच्ये करणे वाच्ये च तृतीया विहिता वर्तते । तस्मात् तृतीयायाः कर्तृकारकं करणकारकं चार्थ इति लभ्यते । एवं सति कथं ग्रन्थकृता आश्रयोर्थ इति प्रतिज्ञातम्, तस्मात् सूत्रविरोधोऽस्ति खलु इति ।

**अत्रोत्तरम् -** 'कर्तृकरणयोस्तृतीये'ति सूत्रबलात् कर्ता एव तृतीयार्थः इति सिद्ध्यति । किन्तु को नाम कर्तेति प्रश्ने 'स्वतन्त्रः कर्ता' (पा.सू. १-४-५४) इति सूत्रमहिम्ना स्वातन्त्र्याश्रयः कर्तेति लभ्यते । तत्र किं नाम स्वातन्त्र्यमिति चेत् लोके इतरानधीनत्वं स्वातन्त्र्यमिति प्रसिद्धमस्ति । तादृशस्य स्वातन्त्र्यस्य प्रकृते विवक्षणे तु देवदत्तः पचतीति स्थले देवदत्तः स्थाल्यादीतरकारकानधीनतयैव पाकक्रियां निर्वर्तयति, अन्यानि तु कारकाणि देवदत्ताधीनतयेति देवदत्तस्यैव कर्तृत्वम्, अन्येषां तु नेति अभीष्टव्यवस्थायाः सिद्धत्वेपि यत्र अचेतनानां कर्तृत्वं यथा घटो भवति, रथो गच्छति इत्यादिस्थले, तत्र अचेतनानां सर्वदा इतराधीनतयैव कार्यनिर्वर्तकत्वमिति तेषामितरानधीनत्वरूपं स्वातन्त्र्यं नास्तीति कर्तृसंज्ञैव न स्यात्, तथा सति तत्प्रयुक्ततृतीयापि न स्यात् ।

---

सह-आचार्यः, व्याकरणविभागः, राष्ट्रियसंस्कृतविद्यापीठम् , तिरुपतिः (आं.प्र.)

अतो धातूपात्तव्यापाराश्रयत्वमिति पारिभाषिकं स्वातन्त्र्यं विवक्षितम् । तथा सति रथो गच्छतीति अचेतनकर्तृकस्थले रथस्य स्वयमितराधीनतया कार्यनिर्वाहकत्वेपि धातूपात्तगमनरूपव्यापाराश्रयत्वं निर्बाधमिति तस्यापि कर्तृसंज्ञा, तत्प्रयुक्ततृतीया च सिद्ध्यतीति न कश्चिद्दोषः । एवं च पारिभाषिकस्वातन्त्र्याश्रयणेन व्यापाराश्रयः कर्तेति लब्धः। तत्र व्यापारांशस्तावत् धातुनैव उक्त इति अनन्यलभ्यः शब्दार्थ इति न्यायमनुसृत्य पुनस्तत्रार्थे तृतीयायाः शक्तिकल्पनं नैव क्रियते । अतोऽवशिष्टे आश्रयांशे एव शक्तिस्सिद्ध्यति । एवं रीत्या कर्तरि विहिताया अपि तृतीयाया आश्रयार्थकत्वं सिद्ध्यति। अतो नैव सूत्रविरोध इति सर्वं समञ्जसम् । स्पष्टमिदं वैयाकरणभूषणसारे सुबर्थनिणये ।[२]

**कारकान्तराणामपि कर्तृत्वसमर्थनम्**

अत्र काचिदनुपपत्तिः – देवदत्तः स्थाल्यां काष्ठैः तण्डुलं पचति इति प्रयोगे देवदत्तस्तावत् कर्तृकारकम्, स्थाली तावत् अधिकरणकारकम्, काष्ठानि करणकारकाणि, तण्डुलं कर्मकारकमिति व्यवस्था । सर्वेषु कारकेषु देवत्तस्यैव चेतनत्वात् क्रियानुकूलकृतिमत्त्वं तत्रैव संभवतीति देवदत्त एव कर्ता भवति, अन्यानि कारकाणि तावद् देवदत्ताधीनतया पाकक्रियां निर्वर्तयन्तीति न तेषां कर्तृत्वं कथञ्चिदपि सम्भवति लोकरीत्या । परन्तु शास्त्रे तु न यथालोकम् । अधिकरणादिकारकाणामपि अत्र शास्त्रे कर्तृत्वमिष्यते । तत्कथं सङ्गच्छते ?

**अत्रेत्थमनुपपत्तिपरिहारः** – लोकरीत्या न तथा भवेन्नाम तथापि यथाऽस्माभिः स्पष्टीकृतम् उपरि यत् कर्तृत्वं नाम न इतरानतधीनत्वरूपं स्वातन्त्र्यं नापि कारकचक्रप्रयोक्तृत्वरूपम् इति विवक्षणीयम् । अचेतनकर्तृकस्थले घटो भवति, रथो गच्छतीत्यादौ अचेतनानां तादृशस्वातन्त्र्यस्य निरूपयितुमशक्यत्वात् । अतः शास्त्रे पारिभाषिकं विवक्षणीयमिति तच्च धातूपात्तव्यापाराश्रयत्वमिति पारिभाषिकमेव ।

**प्रसङ्गोपात्ता शङ्का** – यदत्रोक्तं – कारकचक्रप्रयोक्तृत्वरूपकर्तृत्वं न स्वीकर्तव्यम् इति । तत्स्वीकारे को दोषः – इति चेद्

**अत्रोच्यते** – कारकचक्रप्रयोक्तृत्वरूपकर्तृत्वमित्यस्य अयमर्थः तार्किकादयः 'कारकान्तराप्रयोज्यत्वे सति कारकचक्रप्रयोज्यत्वकर्तृत्वमिति वदन्ति।' अचेतनेपि चेतनत्वारोपेण इदम् ।[३] तेन स्थाल्यादीनां कर्तृत्वमुपपद्यते । **तदयुक्तम्** – स्थाली पचति, असिः छिन्नति इत्यादौ स्थाल्यादेः कारकचक्राप्रयोजकत्वात् कारकान्तरप्रयोज्यत्वाच्च, कर्तृत्वं न स्यात् । स्थालिस्थे यत्ने पचिना कथ्यमाने इत्यदिभाष्यात् स्थाल्यादिनां स्वातन्त्र्ये लब्धे अपि नहि स्थाली देवदत्तादि प्रेरणां विना पक्तुं शक्नोति, तस्याः कारकान्तरप्रयोज्यत्वं तु नैव प्रतिकर्तुं शक्यते। अतः कर्तृत्वं हि धातूपात्तव्यापाराश्रयत्वमेव । अनयारीत्या कारकचक्रप्रयोक्तृत्वरूपकर्तृत्वखण्डने कौण्डभट्टपरमलघुमञ्जूषाकारयोः समाना रीतिः ।

**नागेशोपाध्यायस्तु** 'तद्धात्वर्थीयकारकचक्रप्रयोक्तृत्वं सूत्रे स्वातन्त्र्यम् । अत्र च

कारके इति सूत्रस्थं भाष्यं मानम् । तत्र हि **कथं** पुनर्ज्ञायते कर्त्ता प्रधानमिति ? यत्सर्वेषु साधनेषु सन्निहितेषु कर्ता प्रवर्तयिता भवति ।[४] एवञ्चाचेतने प्रयोजकत्वादेरारोपे बाधाभावात् तेषां कर्तृत्वं सुलभमिति । एवं स्वेच्छाधीनप्रवृत्तिनिवृत्तिकत्वमपि स्वातन्त्र्यम् । एतच्च स्वतन्त्रः कर्ता इति सूत्रे भाष्ये स्पष्टम्, स्पष्टतरञ्च तत्रैवोद्योते ।[५] धात्वर्थव्यापाराश्रयत्वं स्वातन्त्र्यमिति तु न युक्तम् । स्वतन्त्र पदस्य तत्रापरिभाषणात् । लोके उक्तार्थयोरेव तत्प्रवृत्ते । निरूक्तभाष्यार्थप्रतिपादक एव 'प्रागन्यतः शक्तिलाभात्[६]' इत्यादिहरिग्रन्थः इत्यभिप्रैति ।[७] विस्तरस्तु लघुमञ्जूषायां सुबर्थवादे वर्तते तत्त्वं तत एव ज्ञेयम् । व्यक्तोऽयमाशयः परमगुरुभिः तत्त्वदर्शिनीकारैः भूषणसारव्याख्यायाम् तत्त्वदर्शिन्यामपि ।[८]'

एवं च यन्निष्ठव्यापारो धातुना अभिधीयते तदा धातूपात्तव्यापाराश्रयत्वं तस्यैव कारकस्य संभवति। एवं च धातूपात्तव्यापाराश्रयत्वं तस्य कारकस्य वर्तते इति तस्यापि कर्तृता सिद्धा । यथा देवदत्तः स्थाल्यां काष्ठैः तण्डुलं पचतीत्यत्र प्रतिकारकं कश्चन व्यापारो वर्तते । येन व्यापारेण प्रतिकारकं पाकक्रियाजनकं भवति । स्थाल्यां तण्डुलधारणानुकूलरूपो व्यापारो वर्तते । काष्ठेषु ज्वलनानुकूलव्यापारो वर्तते । यदि पच्धातुना स्थालीनिष्ठः धारणानुकूलो व्यापारो विवक्षितश्चेत् तदा धातूपात्तव्यापाराश्रयत्वं स्थाल्या एव संभवतीति स्थाल्या एव कर्तृत्वमतः स्थाली पचीति प्रयोगश्च सङ्गच्छते । यदि काष्ठनिष्ठः ज्वलनानुकूलो व्यापारः धातुना विवक्षितश्चेत् तदा धातूपात्तव्यापारश्रत्वं काष्ठस्यैवेति तस्यापि कर्तृता, तत्प्रयुक्तः काष्ठानि पचन्तीति प्रयोगश्च सङ्गच्छते । एवं रीत्या कारकान्तराणामपि कर्तृत्वं शास्त्रसम्मतं द्रष्टव्यम् । अनया रीत्या कारकान्तराणामपि कर्तृत्वं शास्त्रसम्मतमिति प्रतिपादितं भूषणसारे ।[९]

कारकान्तराणामपि कर्तृत्वसाधकं प्रमाणान्तरम् – तत्र कैयटः कारके इति सूत्रभाष्यस्थं स्थालिस्थे यत्ने पचिना कथ्यमाने[१०] इत्यदिभाष्यं व्याचक्षाणः प्रदीपे[११] – सर्वेषां कारकाणां साध्यत्वेन साधारणी क्रिया ततश्च सर्वेषां तस्याः कर्तृत्वम् । अवान्तरव्यापाररूपविवक्षायान्तु करणत्वादिकम् । तदुक्तं वाक्यपदीये –

**निष्पत्तिमात्रे कर्तृत्वं सर्वत्रैवास्ति कारके ।**

**व्यापारभेदापेक्षायां करणत्वादिसम्भवः ।।** इति।[१२]

अर्थस्तु स्पष्ट एव । उदाहरणेन इतोऽपि स्पष्टं भवति – यथा मातापित्रोः अपत्योत्पादने कर्तृत्वं, भेदविवक्षायां 'अयमस्याम्' 'इयमस्मात्' जनयतीत्यधिकरण–त्वाद्यवस्थायां न भवति, '**स्वतन्त्रः कर्ता**' इत्यत्र कारकत्वादेव स्वातन्त्र्ये लब्धे पुनः स्वतन्त्रविधिः नियमार्थः, तेन स्वातन्त्र्यमेव यस्य कर्तृसंज्ञा तस्य, न तु पारतन्त्र्यसहितस्वातन्त्र्ययुतस्य। अयमाशयः वस्तुतः वाक्यपदीये व्यक्तः स एव प्रदीपेऽनूदितः।[१३] तत्र हि – '**अयमस्यामियमस्मादिति भेदो विवक्षया**'[१४] इति कारिका साधनसमुद्देशे पठिता। तत्र च व्याख्याने स्पष्टतरं व्यक्तं – पुत्रजनने इत्यादिना दृष्टान्तः उक्तः।

यदा मातापितरौ पुत्रं जनयतः इति उच्यते तदा उभयोः कर्तृत्वम्। यदा तु पिता अस्यां पुत्रं जनयति तदा पितुः कर्तृत्वम् । यदा तु इयम् अस्मात् पुत्रं जनयति तदा मातुः कर्तृत्वम्। अनया रीत्या एक एव व्यापारो यदा तत्तदाश्रयभेदेन प्रकृतधातुवाच्यः तदा तत्तद्धात्वर्थव्यापाराश्रयस्य कर्तृत्वमित्याशयः। अत एव विवक्षातः कारकाणि भवन्तीति वादः। अत्र यद्यपि एकदैव सर्वेषां कारकाणां ते ते व्यापाराः भवन्ति परन्तु धातुवाच्यव्पाराश्रयस्यैव कर्तृत्वम् । अत एव अन्येषां ये व्यापाराः न धातुवाच्या तदा न तेषां कर्तृत्वमिति । यदा तु यस्य कारकस्य व्यापारः धातुवाच्यः तदा तस्य तस्मिन् व्यापारे स्वातन्त्र्यात् 'स्वतन्त्रः कर्ता' इति सूत्रेण कर्तृत्वं, धातुना च अभिहितत्वात् प्रथमा च भवति ।

**ब्रह्मसूत्रभाष्यविरोधः, तत्परिहारश्च**

एतावता प्रबन्धेन कारकान्तराणामपि पारिभाषिकं स्वातन्त्र्यं भवितुमर्हति। तस्मात् तान्यपि कारकाणि कर्तृत्वधर्माश्रयाः भवन्ति इति निरूपितम्। किन्तु एकस्यैव कारकस्य स्वगतधर्मेण सह कर्तृत्वस्यापि स्वीकारे ब्रह्मसूत्रभाष्यविरोधस्स्यात् । तथा हि अस्ति एकं ब्रह्मसूत्रं **कर्तृकर्मव्यपदेशाच्च**[१५] इति । तत्रायं विचारः प्रवृत्तः यत् मनोमयः प्राणशरीरः इत्यत्र मनोमयशब्देन किं जीवात्मा विवक्षितः उत अन्यो वेति । तत्र यदि जीवात्मा मनोमयशब्दवाच्यस्स्यात् तदा एतमितः प्रेत्याभिसंभवितास्मि इति वाक्येपि एतमिति सर्वनाम्ना मनोमयशब्दप्रतिपाद्यस्य परामर्शात् एतमित्यस्य जीवात्मानमित्यर्थः फलति । तत्रैव वाक्ये अभिसंभवितास्मि इत्यनेनापि जीवात्मैव परामृश्यते । एवं च एतमित्यनेनापि जीवः परामृष्टः। अभिसंभवितास्मि इत्यनेनापि जीवः परामृष्टः। तथा च एतमिति द्वितीयया प्राप्तिक्रियाकर्मत्वेन परामृष्टः, अभिसंभवितास्मि इत्याख्यातेन प्राप्तिक्रियाकर्तृत्वेन परामृष्टः, एकस्या एव व्यक्तेः कर्तृत्वकर्मत्वधर्मद्वयसमवेशो विरुद्ध इति मनोमयशब्देन जीवात्मा न वविक्षणीयः। तथा सति एतमित्यनेन जीवात्मनो अपरामर्शात् प्राप्तिकर्मत्वं नास्ति, अपि तु प्राप्तिकर्तृत्वमेवेति न दोष इत्यभिहितं भाष्यकृता। तथा च कारकान्तराणामपि कर्तृत्वे भाष्यविरोधस्स्पष्ट एव । कथं तर्हि पारिभाषिकं स्वातन्त्र्यं स्वीकृत्य सर्वेषामपि कारकाणां कर्तृत्वं प्रतिपादितं वैयाकरणैः इति **प्रश्नस्तिष्ठति** ।

**अत्रायं समाधिः - कर्तृकर्मव्यपदेशाच्च** इति सूत्रेण एकस्मिन् धर्मिणि कर्तृत्वकर्मत्वधर्मद्वयसमावेशो अयुक्त इति न प्रतिपाद्यते । अपि तु कर्तृत्वकर्मत्वयोः सतोः कर्तृत्वप्रयुक्तकर्तृसंज्ञा कर्तव्या उत कर्मत्वप्रयुक्तकर्मसंज्ञा कर्तव्येति विप्रतिषेधस्स्यात् । तथा सति परया कर्तृसंज्ञया कर्मसंज्ञायाः बाधात् एतमित्यत्र कर्मसंज्ञाप्रयुक्ता द्वितीया न स्यात् । अतः एकदा एक एव व्यवहारो अभ्युपगन्तव्यः। परत्वात् कर्तृसंज्ञाया एवाभ्युपगन्तव्यत्वात् एतमिति द्वितीया असंगता । एवं च एतमिति द्वितीयानुपपत्तिभिया मनोमयशब्दस्य जीवात्मपरत्वं नास्तीत्येव भाष्यकृतो अभिप्रायः। न तु एकस्मिन् धर्मिणि धर्मद्वयसमावेशो अनिष्ट इति तद्भाष्यस्याशयः। अतः कारकान्तराणां कर्तृत्वस्वीकारे ब्रह्मसूत्रभाष्यविरोधाभावात्

कारकान्तराणां कर्तृत्वं स्वीकृत्य स्थाली पचति, काष्ठानि पचन्ति इत्यादयः प्रयोगाः उपपादयितुं शक्यन्ते। स्पष्टमिदं सर्वं वैयाकरणभूषणसारे तद्व्याख्यायां तत्त्वदर्शिन्याञ्च स्पष्टतरम्।[१६]

**करणतृतीयायाः आश्रयार्थकत्वव्यवस्थापनम्**

आश्रयोऽवधिरुद्देश्यः सम्बन्धः शक्तिरेव वा इति कारिकया द्वितीयातृतीयासप्तमीनामाश्रयोर्थ इति प्रतिज्ञातमिति आदावेवोक्तम्। एतावता कर्तृतृतीयायाः आश्रयार्थकत्वं व्यवस्थापितम्। अतः परं करणतृतीयायाः आश्रयार्थकत्वं निरूप्यते। साधकतमं करणम् (पा.सू. १–४–४२) इति सूत्रेण करणसंज्ञा विधीयते। कारकेषु यत् साधकतमं भवति तदेव कारकं करणमित्यर्थः। साधकतममिति तमब्घटितप्रयोगेन कारकान्तराणामपेक्षया अस्य कारकस्य कश्चन उत्कर्षो बोध्यते। स च उत्कर्षः क इति चेत् सर्वाण्यपि कारकाणि स्वस्वव्यापारद्वारा क्रियां जनयन्त्येव। किन्तु यत्कारकगतव्यापाराव्यवहितोत्तरं फलं जायते, तच्च कारकं कारकान्तरापेक्षया उत्कृष्टमिति परिगण्यते। एवं च अव्यवहितप्राक्क्षणे फलजनकव्यापारवत्त्वं हि उत्कर्षः। तादृशोत्कर्षवत्कारकं करणमिति संज्ञां प्राप्नोति। एवं च 'रामेण बाणेन हतो वाली' इति प्रयोगे बाणगतव्यापारो नाम शरीरस्य द्वैधीभावसंपादनरूपो व्यापारः, तत्समनन्तरमेव प्राणवियोगरूपं फलं जायते इति बाणस्य उत्कर्षात् बाणः करणसंज्ञः स्यादिति बाणेन इति तृतीया सङ्गच्छते। अत्रार्थे हरिकारिका अपि प्रमाणम्। तथा हि –

**क्रियायाः परिनिष्पत्तिर्यद्व्यापारादनन्तरम्।**
**विवक्ष्यते यदा यत्र करणं तत्तदा स्मृतम्।** इति ।।[१७]

यद्व्यापारादनन्तरं क्रियायाः परिनिष्पत्तिर्जायते इति विवक्ष्यते तदा तत्कारकं करणमिति स्मृतमिति श्लोकस्यान्वयः। यथा पूर्वोक्ते उदाहरणे बाणगतस्य शरीरद्वैधीभावरूपव्यापारस्य अनन्तरं प्राणवियोगानुकूल–क्रियायाः परिनिष्पत्तिरिति विवक्ष्यते तदा तत् करणमिति स्मृतमिति। एवं च करणं नाम फलाव्यवहितव्यापाराश्रय इति सिद्धम्। तथा च फलस्य धातुना लाभात् व्यापारः, आश्रयश्च करणतृतीयार्थ इति पर्यवस्यति। अतो न सूत्रविरोधः।

**ब्रह्मसूत्रभाष्यविरोधाशङ्का, तत्परिहारश्च**

कर्तृतृतीयार्थप्रतिपादनसंदर्भे यथा कारकान्तराणामपि कर्तृत्वं सङ्गच्छते इति निरूपितं, तथा प्रकृते कारकान्तराणाम् अपि करणत्वविवक्षा इष्यते। यतो हि लोके अधिकरणकारकस्य पथः करणत्वविक्षा दृष्टा। यथा पथा गच्छतीति। तस्मात् इदमेव करणकारकं भवतीति निर्देष्टुं न शक्यते। उक्तं चायमेव विषयो वाक्यपदीयकारेणापि। तद्यथा–

**'वस्तुतस्तदनिर्देश्यं न हि वस्तु व्यवस्थितम्।**
**स्थाल्या पच्यते इत्येषा विवक्षा दृश्यते यतः'।** इति ।।[१८]

अस्यायमर्थः यत् स्थाल्या पच्यते इति अधिकरणस्यापि करणत्वविवक्षा यतो दृश्यते अतः तद् – करणत्वं वस्तुतः अनिर्देश्यम् – इदमेव करणमिति निर्देष्टुमशक्यम् इति। एवं चानेन वाक्यपदीयश्लोकेनापि ज्ञायते यत् कारकान्तराणामपि करणत्वमिष्टमेवेति। तथा सति कर्तृतृतीयास्थले इव अत्रापि ब्रह्मसूत्रभाष्यविरोधस्स्यात्। तथा हि –

अस्ति एकं सूत्रं कर्ता शास्त्रार्थवत्त्वात्[१९] इति । जीवः कर्ता उत बुद्धिः कर्त्री इति विचारावसरे प्रवृत्तमिदं सूत्रं कर्ता शास्त्रार्थवत्त्वादिति । जीव एव कर्ता न तु बुद्धिरिति तस्य सूत्रस्यार्थः। तदेव द्रढयितुं सूत्रान्तरमेकं प्रणीतं यत् **शक्तिविपर्ययात्**[२०] इति। तस्य सूत्रस्य चायमर्थः यत् यदि बुद्धिः कर्त्री स्यात् विज्ञानपदवाच्यायाः बुद्धेः करणत्वेन श्रुतौ व्यवहारस्य दर्शनात् सा शक्तिर्नश्येत् । कर्तृत्वशक्तिरेव भवेदिति शक्तिविपयर्यस्स्यात् । तस्मात् बुद्धेः करणत्वमेव न तु कर्तृत्वमिति । एवं चानेन सूत्रेण, तद्भाष्येण च स्पष्टं ज्ञायते कारकान्तराणां शक्त्यन्तरं न स्वीकार्यमिति। एवं सति कथं कारकान्तराणां करणत्वेनापि विवक्षा भवितुमर्हतीति कथनमसङ्गतमेव। यतो हि विवक्षातः कारकान्तराणामपि करणत्वे प्रकृते बुद्धेः कर्तृत्वेपि करणतया विवक्षायां बाधकाभावात् करणत्वशक्तेः नाशापत्त्या करणभूतायाः बुद्धेः कर्तृत्वं नास्तीति प्रतिपादनमसङ्गतं स्यात्। तस्मात् विवक्षातः अन्येषामपि करणत्वं स्यादिति कथनमसंगतमिति अभिप्रायः।

**अत्रेत्थं शङ्का परिहारः** – तेन सूत्रेण, तद्भाष्येण च न कारकान्तरस्य करणत्वं विवक्षया सिद्ध्यतीति निरस्यते । अपि तु **'तदेतेषां प्राणानां विज्ञानेन विज्ञानमादाय'**[२१] इति श्रुतौ विज्ञानेनेति करणत्वशक्तिः क्लृप्ता वर्तते। एवं च क्लृतां शक्तिं परित्जज्य कर्तृत्वशक्तिः किमर्थं कल्पनीयेत्येव भाष्यकृतोऽभिप्रायः। न तु सर्वथा कर्तृभूतायाः बुद्धेः करणत्वविक्षा असंभविनीति। इत्थं ब्रह्मसूत्रभाष्यशङ्का तत्परिहारश्च दर्शितः भूषणसारे तृतीयाविभक्त्यर्थनिर्णये । ततोऽपि विस्तरेण च प्रत्यपादि तद्व्याख्यायां तत्त्वदर्शिन्याम् ।[२२] अनया रीत्या तत्तद्ग्रन्थकर्तृमतपरिशीलनपुरस्सरं तृतीयार्थो यथामति समालोचितः ।

**पादटिप्पण्यः –**

१. भूषणसारः तत्त्वदर्शिनी सुबर्थनिर्णये कारिका – २४ पृ. सं. २९९

२. भूषणसारः तत्त्वदर्शिनी सुबर्थनिर्णये, पृ. सं. ३३६

३. परमलघुमञ्जूषा किरणावलीव्याख्यायुता कारकप्रकरणे पृ. – २५९

४. कारके १-४-२३ सूत्रे भाष्ये पृ. सं. २४५

५. स्वतन्त्रः कर्ता १-४-५४ सूत्रे भाष्ये, उद्योते च पृ. सं. २७९

६. प्रागन्यतः शक्तिलाभान्न्यग्भावापादनादपि ।
तदधीनप्रवृत्तित्वात् प्रवृत्तानां निवर्तनात् ।।
अदृष्टत्वात् प्रतिनिधेः प्रविवेके च दर्शनात् ।
आरादप्युपकारित्वे स्वातन्त्र्यं कर्तुरुच्यते ।।
वाक्यपदीये तृतीयकाण्डे साधनसमुद्देशे कारिका – १०१ – १०२, पृ. सं. २८६

७. नागेशभावप्रकाशे (लघुमञ्जूषाव्याख्या) सुबर्थवादे, पृ. सं. १४४ – १४९
८. भूषणसारः तत्त्वदर्शिनी सुबर्थनिर्णये पृ. – ३५५
९. भूषणसारः तत्त्वदर्शिनी सुबर्थनिर्णये पृ. – ३४८
१०. कारके १-४-२३ सूत्रे भाष्ये पृ. सं. २४५
११. कारके १-४-२३ सूत्रे भाष्यप्रदीपे (कैयटे) पृ. सं. २४६
१२. वाक्यपदीये तृतीयकाण्डे साधनसमुद्देशे कारिका – १८, पृ. सं. १३०
१३. कारके १-४-२३ सूत्रे भाष्यप्रदीपे (कैयटे) पृ. सं. २४६
१४. पुत्रस्य जन्मनि यथा पित्रोः कर्तृत्वमुच्यते ।
अयमस्यामियं त्वसम्मादिति भेदो विवक्षया ।।
वाक्यपदीये तृतीयकाण्डे साधनसमुद्देशे कारिका – १९, पृ. सं. १३२
१५. ब्रह्मसूत्रम् १.२.४
१६. भूषणसारः तत्त्वदर्शिनी सुबर्थनिर्णये पृ. – ३४८ – ३५४
१७. वाक्यपदीये, तृ. का., साधनसमुद्देशे ९० कारिका, पृ. सं. २७३
१८. वाक्यपदीये, तृ. का., साधनसमुद्देशे ९१ कारिका, पृ. सं. २७४
१९. ब्रह्मसूत्रम् २-३-३३
२०. ब्रह्मसूत्रम् २-३-३८
२१. यत्रैष सुप्तोऽभूद् य एष तदेषां प्राणानां विज्ञानेन विज्ञानमादाय य एषोऽन्तर्हृदय आकाशस्तस्मिञ्छेते (बृ. अ. २, ब्रा. १, मा. १७)
२२. भूषणसारः तत्त्वदर्शिनी सुबर्थनिर्णये पृ. – ३५५ – ३६१

**परिशीलिताः ग्रन्थाः –**


१. नागेशभट्टविरचितपरमलघुमञ्जूषा, भावप्रकाशिकाबालबोधिनीसंस्कृतहिन्दीव्याख्यायुता, व्याख्याकारः – डॉ. जयशङ्करलालत्रिपाठी, प्रकाशकः – चौखम्बा-कृष्णदास-अकादमी, वाराणसी चतुर्थसंस्करणम् – २०११
२. नागेशभट्टविरचितपरमलघुमञ्जूषा, किरणावलीसंस्कृतव्याख्योपेतहिन्द्यनुवादसहिता, व्याख्याकारः – आचार्यः लोकमणिदाहालः, प्रकाशकः – चौखम्बा-सुरभारती-प्रकाशन, वाराणसी पुनर्मुद्रितसंस्करणम् – २००६
३. कौण्डभट्टविरचितवैयाकरणभूषणसारः, तत्त्वदर्शिनीव्याख्यया समुल्लसितः, व्याख्याता – श्री पेरि सूर्यनारायणशास्त्री, सम्पादकः – डॉ. कोम्पेल्ल सत्यनारायणशास्त्री, प्रकाशकः- श्रीवेंकटेश्वरविश्वविद्यालयः, तिरुपतिः, प्रथमसंस्करणम् – २०१६
४. कौण्डभट्टविरचितवैयाकरणभूषणसारः, प्रभादर्पणव्याख्याद्वयोपेतः, सम्पादकः- श्रीबालकृष्णपञ्चोली, प्रकाशकः-चौखम्बा-संस्कृत-संस्थान, वाराणसी पुनर्मुद्रितसंस्करणम्- २०११
५. नागेशभावप्रकाशः (लघुमञ्जूषाव्याख्या) सुबर्थविचारः, म. म. पेरि सूर्यनारायणशास्त्रिविरचितः, तिरुपतौ प्रकाशितः, Published with the Financial Assistance by the Human Resource Development, Gov. of India, 1991
६. वाक्यपदीयम् (तृतीयकाण्डम् – द्वितीयो भागः) हेलाराजविरचितप्रकाशव्याख्यया श्रीरघुनाथशर्मकृत-अम्बाकर्त्रीव्याख्यया च सनाथितम् , प्रकाशकः – सम्पूर्णानन्दसंस्कृतविश्वविद्यालयः, वाराणसी, द्वितीयसंस्करणम् – १९९७

पाणिनीया
**ISSN-2321-7626**
Vol. XXIV, Year VI
विक्रमाब्दः २०७६
ज्येष्ठ-श्रावणमासाङ्कः
मई-जुलाई 2019

# वाच्यार्थव्यङ्ग्यार्थयोः परस्परम् आश्रयादिभेदे व्यञ्जनासिद्धिः

**डॉ. राजकुमार मिश्रः**

**अर्था नैकविधा भवन्ति कविभिः काव्ये प्रणीते परं**
**वेद्यास्सन्ति समेऽपि ते सहृदयैश्शक्तित्रयेणाचिरम् ।**
**वाच्यं तेष्वभिधा प्रबोध्य विगते[1] लक्ष्यं च सा लक्षणा**
**व्यङ्ग्यार्थं ह्यवबोध्य नास्ति विहता या तां श्रये व्यञ्जनाम्[2] ।।**

**भूमिका-**

अस्माकं शास्त्रे आचार्याणां सिद्धान्ताः खण्डनमण्डनविधिना पुष्टिं यान्ति परीक्षापदवीं यान्ति वा, एतेन सिद्धान्तानाम् उपादेयता हेयता च परिशील्येते । अस्माकं काव्यशास्त्रे अर्थबोधिकाः तिस्रः शक्तयः कल्पिता वर्तन्ते अभिधा, लक्षणा व्यञ्जना चेति । किन्तु केचन आचार्याः व्यञ्जनां शक्तिम् अभिधायामेव अन्तर्भाव्य द्वे एव शक्ती मन्तुं यतन्ते तेषु भट्टलोल्लटः प्रमुखोऽस्ति । अत्र प्रस्तूयमाने शोधपत्रे अनेकयुक्त्या व्यञ्जनाया अभिधायाम् अगतार्थता साध्यते ।

अस्माकं काव्यशास्त्रे व्यञ्जनासिद्धये अनेके तर्का दीयन्ते काव्यशास्त्रिभिः । केचन भट्टलोल्लटादय आचार्या व्यञ्जनाम् अभिधायामेव अन्तर्भावयन्ति केचन च पुन आचार्या व्यञ्जनां लक्षणायामेव अन्तर्भावयन्ति । व्यञ्जनाया अभिधायाम् अन्तर्भावे भट्टलोल्लटादीनां व्यञ्जनाविरोधिनाम् '**सोऽयमिषोरिव दीर्घदीर्घतरोऽभिधाव्यापारः**'[3] इति पक्षो वर्तते । व्यञ्जनाविरोधिनां भट्टलोल्लटादीनां मते यथा केनापि शक्तिमता धनुर्धारिणा चालितो बाणः शत्रोः कवचभेदं, मर्मभेदं प्राणनाशं च कर्तुं क्षमते तथा एक एव शब्दस्य अभिधाव्यापारः पदार्थबोधं, पदपदार्थसंसर्गबोधं तथा च व्यङ्ग्यार्थबोधमपि कारयितुं क्षमते । किन्तु तेषां व्यञ्जनाविरोधिनां पक्षोऽयम् अशक्तः अयुक्तियुक्तः, यतोहि '**शब्दबुद्धिकर्मणां विरम्य व्यापाराभावः**'।[4] या अभिधा वाक्यार्थमपि बोधयितुं न क्षमते, सा वाक्यार्थबोधानन्तरं

व्यजमानं व्यङ्गार्थं कथं बोधयेत् ? यतोहि पदार्थमात्रं बोधयित्वा अभिधा विगतव्यापारा भवति, तदनु वाक्यार्थबोधः स्वस्वपदैरुपस्थितानाम् अर्थानां वक्तुस्तात्पर्यानुरोधेन आकाङ्क्षायोग्यतासक्तिरूपेण परस्परसंसर्गरूपसम्बन्धेन तात्पर्य-वृत्त्या जायते । इत्थं अभिधया सङ्केतग्रहमहिम्ना केवलात् पदार्थबोधनात् तात्पर्यवृत्त्या च केवलाद् वाक्यार्थबोधनात् पश्चाद् यस्य अर्थस्य (व्यङ्ग्यस्य) बोधो जायते तस्य अर्थस्य '**सोऽयमिषोरिव दीर्घदीर्घतरोऽभिधाव्यापारः**' इति कथनमात्रेणैव कथं प्रकाशिका बोधिका वा स्यादभिधा ?

मन्ये वाच्यार्थव्यङ्ग्यार्थयोः पारस्परिकस्य अन्तरस्य अवबोधने आनन्दवर्धनाचार्येण युक्तमेव प्रत्यपादि-

**शब्दार्थशासनज्ञानमात्रेणैव न वेद्यते ।**
**वेद्यते स तु काव्यार्थतत्त्वज्ञैरेव केवलम् ।।**[५]

अर्थात् यदि वाच्यार्थव्यङ्ग्यार्थयोः परस्परं भेदो न स्यात् प्रत्युत एकरूपतैव स्यात् तर्हि अभिधैव तमर्थं बोधयेत् । एतदर्थं च पदपदार्थज्ञानमात्रेणैव तस्य अर्थस्य बोधः स्यात् । किन्तु प्रतिपादकबोद्धृमहिम्ना द्वयोर्वाच्यार्थव्यङ्ग्यार्थयोर्महान् भेदो लक्ष्यते, अर्थात् वाच्यार्थबोधे केवलस्य व्याकरणस्य ज्ञानं पर्याप्तं भवितुर्महति । वाच्यार्थबोधे प्रतिपादकस्य बोद्धुश्च महत्त्वं न भवति, यतोहि वाच्यार्थबोधस्तु सामान्येन व्याकरणज्ञानेनैव सम्पद्यते । किन्तु व्यङ्गार्थस्य प्रतिपादने अवबोधने च व्याकरणज्ञानेन सह वक्तरि बोद्धरि च सहृदयत्वं काव्यतत्त्वज्ञत्वं वा सुतरामपेक्षणीयं भवति, इत्यस्याशयो ध्वन्यालोककृत आनन्दवर्धनाचार्यस्य। उक्तस्य आशयस्य सिद्धये अनेकानि कारणानि सन्ति यैरभिधायां व्यञ्जनाया अन्तःपातो न कथमपि भवितुमर्हति, यथा-

**बोद्धृस्वरूपसंख्यानिमित्तकार्यप्रतीतिकालानाम् ।**
**आश्रयविषयादीनां भेदाद्भिन्नोऽभिधेयतो व्यङ्ग्यः ।।**[६]

अर्थात् बोद्धृदृष्ट्या, स्वरूपदृष्ट्या, संख्यादृष्ट्या, निमित्तदृष्ट्या, कार्यदृष्ट्या, प्रतीतिदृष्ट्या, कालदृष्ट्या, आश्रयदृष्ट्या, विषयदृष्ट्या च अभिधेयतो वाच्यार्थाद् वा व्यञ्जनाप्रतिपादितो व्यङ्ग्यः सर्वथा भिन्नो भवति । क्रमश एतेषां बोद्धृस्वरूपसंख्यादीनाम् उदाहरणानि उपस्थाप्यन्ते ।

**बोद्धृदृष्ट्या वाच्यार्थव्यङ्ग्यार्थयोर्भेदः**

वाच्यार्थमात्रस्य व्यङ्ग्यार्थस्य च बोद्धा पृथक् पृथग् भवति, वाच्यार्थमात्रस्य बोद्धा वैयाकरणो भवति तथा च व्यङ्ग्यार्थस्य बोद्धा व्याकरणज्ञानसम्पन्नः काव्यतत्त्ववित् सहृदयो भवति अर्थाद् व्यङ्ग्यार्थावबोधे व्याकरणादिज्ञानातिरिक्कं बोद्धरि सहृदयत्वमपि आवश्यकम्। आनन्दवर्धनाचार्यस्य उपर्युक्ता '**शब्दार्थशासनज्ञानमात्रेणैन न वेद्यते**' इति कारिका अमुमेव

आशयं पुष्णाति ।

**स्वरूपदृष्ट्या वाच्यार्थव्यङ्ग्यार्थयोर्भेदः**

स्वरूपदृष्ट्याऽपि वाच्यार्थव्यङ्ग्यार्थयोर्महदन्तरं दृश्यते । क्वचित् वाच्यार्थस्य स्वरूपं विधिपरकं भवति तर्हि व्यङ्ग्यार्थस्य स्वरूपं निषेधपरकं, यथा–

**भ्रम धार्मिक ! विश्रब्धः सः शुनकोऽद्य मारितस्तेन ।**

**गोदावरीनदीकूललतागहनवासिना दृप्तसिंहेन ।।**[७]

अत्र सकलोऽपि वाच्यार्थः 'भ्रम' इति कथनाद् विधिपरकः, किन्तु बोधव्यवशाद् 'भ्रम' इत्यस्य 'मा भ्रम' इतिरूपेण व्यङ्ग्यार्थो निषेधपरको जायते । अतोऽत्र वाच्यार्थव्यङ्ग्याथर्योः परस्परं स्वरूपभेदः ।

**संख्यादृष्ट्या वाच्यार्थव्यङ्ग्यार्थयोर्भेदः**

वाच्यार्थः सदा एक एव भवति । अर्थाद् कस्यचिदपि वाक्यस्य श्लोकस्य वा अभिधया स्वस्वपदैः उपस्थितानाम् अर्थानां वक्तुः तात्पर्यमहिम्ना आकाङ्क्षासत्तिसन्निधिवशादुत्पन्नः तात्पर्यार्थरूपो वाक्यार्थो वाच्यार्थो वा एक एव भवति, किन्तु व्यङ्ग्यार्थः अनेको भवितुर्महति, अतो द्वयोस्संख्यादृष्ट्याऽपि महदन्तरं द्रष्टुं शक्यते, यथा–'**गतोऽस्तमर्कः**' इति वाक्यस्य अर्थः 'सूर्यः अस्तमितः, 'सूर्यः अस्तं यातो' वा' इत्यस्ति किन्तु व्यङ्ग्यार्थः प्रकरणादिहेतुना बोद्धृवशेन च अनेकविधो भवति । गोचारका यदा 'गतोऽस्तमर्कः' इति वाक्यं शृण्वन्ति तदा तत्कृते व्यङ्ग्यार्थः 'इदानीं सायं जातः अतः गावो निरुध्यन्ताम्', ब्राह्मणाः 'सन्ध्याकर्म उपासनीयम्', प्रियतमः 'प्रियतमां मेलितुम् समयोऽभवत्', श्रमिकः 'सन्तापोऽधुना नास्ती'त्येवंभूता असंख्या व्यङ्ग्यार्था दृश्यन्ते ।

**निमित्तदृष्ट्या वाच्यार्थव्यङ्ग्यार्थयोः भेदः**

वाच्यार्थश्शब्दोच्चारणमात्रेण वेद्यो व्यङ्ग्यार्थश्च प्रतिभानैर्मल्यादिना हेतुना वेद्यो भवतीति युक्तं प्रतिपादयति आनन्दवर्धनाचार्यः–

**तद्वत् सचेतसां सोऽर्थो वाच्यार्थविमुखात्मनाम् ।**

**बुद्धौ तत्त्वार्थदर्शिन्यां झटित्येवावभासते ।।**[८]

**प्रतीतिदृष्ट्या वाच्यार्थव्यङ्ग्यार्थयोर्भेदः**

वाच्यार्थव्यङ्ग्यार्थयोः अर्थकृतचमत्कारप्रतीतिरपि भिन्ना भिन्ना भवति । वाच्यार्थ–बोधानन्तरं यादृशी मानसिकी प्रतीतिर्जायते व्यङ्ग्यार्थबोधानन्तरं यादृशी च मानसिकी प्रतीतिर्जायते द्वयोः महदन्तरम् अनुभूयते सहृदयैः । यतोहि वाच्यार्थप्रतीतिः केवला शाब्दबोधरूपैव भवति किन्तु व्यङ्ग्यार्थप्रतीतिः अधिकस्य अर्थस्य जनकत्वाच्चमत्कारा–त्मिका भवति अतो द्वयोः प्रतीतिदृष्ट्याऽपि भेदः ।

**कालदृष्ट्या वाच्यार्थव्यङ्ग्यार्थयोर्भेदः**

वाच्यार्थव्यङ्ग्यार्थयोः कालभेदोऽपि भवति । अत्र कालभेदो नाम द्वयोः पूर्वपश्चाद्भावेन सत्ता । वाच्यार्थः सदा पदपदार्थज्ञानात्मको भवति अतः पूर्वं तिष्ठति किन्तु व्यङ्ग्यार्थस्य बोधः सदैव वाच्यार्थबोधाश्रितो भवति । वाच्यार्थबोधात् परमेव व्यङ्ग्यार्थस्य बोधो भवितुर्महति, अतः द्वयोः कालभेदोऽपि ।

**आश्रयदृष्ट्या वाच्यार्थव्यङ्ग्यार्थयोर्भेदः**

वाच्यार्थस्य आश्रयः केवलं शब्दो भवति किन्तु व्यङ्ग्यार्थस्य आश्रयः शब्दः, शब्दैकदेशः, अर्थो, वर्णः, सङ्घटना, प्रकरणं, प्रबन्धश्च भवति ।

**विषयभेददृष्ट्या वाच्यार्थव्यङ्ग्यार्थयोर्भेदः**

क्वचित् वाच्यार्थस्य विषयोऽन्यो भवति व्यङ्ग्यार्थस्य चान्यः । द्वयोर्वाच्यार्थव्यङ्ग्यार्थयोः विषयभेदस्योदाहरणं द्रष्टुं शक्यते–

**कस्य न वा भवति रोषो दृष्ट्वा प्रियायाः सव्रणमधरम् ।**
**सभ्रमरपद्माघ्राणशीले वारितवामे सहस्वेदानीम् ।।**[१]

प्रस्तुते पद्ये स्वपत्युः अनुपस्थितौ कामवेदनया परपुरुषेण कृतसम्भोगां सुरतकाले च क्षताधरां स्वसखीं प्रति काचित् नायिका तदा वक्ति यदा सख्याः पतिर्दूरदेशतोऽकस्मादेव गृहस्य द्वारं सम्प्राप्तोऽस्ति । यदि समीपमागत्य सख्याः पतिः स्वपत्न्याः अधरं परपुरुषेण क्षतं पश्येत् तर्हि दुर्दशैव तस्याः, अतः स्वसख्याः त्राणाय नायिका चातुर्येण वक्ति– प्रियायाः सव्रणम् अधरं दृष्ट्वा कस्य रोषो न भवति अर्थात् सर्वस्य रोषो भवति । अयि ! भ्रमरसहितकमलस्य घ्राणतत्परे वारितवामे !! मया तादृशाचरणाद् निवारिताऽपि त्वं न मद्वचः पालितवती अतो भ्रमरदंशाद् अधरे विद्यमानं व्रणं तज्जन्यं दुःखं चेदानीं सहस्वेति पद्यस्य भावः ।

अत्र वाच्यार्थस्य विषयः संबोध्या सखी वर्तते किन्तु 'द्वारं प्राप्तः अस्याः पतिः अस्यै मे सख्यै न कुप्येत्' अथवा 'स्वसखीत्राणात्मकः' किञ्च तादृशवाक्यप्रयोगात् 'सख्याः परपुरुष–कृताधरपानप्रसङ्गोत्पन्नव्रणसम्भावनानिवारको भ्रमरदशनजन्याधरस्थितेः साधको वा यो व्यङ्ग्यार्थो वर्तते तस्य विषयो नायको वर्तते । अतोऽत्र वाच्यार्थस्य विषयो भिन्नो जनो व्यङ्ग्यार्थस्य विषयश्च भिन्नः ।

अत एवंविधे भेदे विद्यमाने अभिधायां व्यञ्जनाया अन्तःपातः कथमपि भवितुं नार्हति, पुनश्च भट्टलोल्लटादीनां व्यञ्जनाविरोधिनां मते लक्षणाया अपि प्रसङ्गो नंक्ष्यति यतोहि 'सोऽयमिषोरिव दीर्घदीर्घतरोऽभिधाव्यापारः' इति नियमेनैव लक्षणया उपस्थितो लक्ष्यार्थोऽपि अभिधायामेव अन्तर्भविष्यति अतो व्यञ्जनाविरोधिनां मतम् अज्ञानविजृम्भितमिति हेतोः काव्ये व्यञ्जनाया स्वीकार आवश्यक इति निष्कर्षः ।

**पादटिप्पण्यः-**

१. विगता च विगता चेति विगते, स्त्रीलिङ्गे द्विवचनरूपम्
२. लेखकेन विरचितम्
३. साहित्यदर्पणः, पञ्चमः परिच्छेदः
४. साहित्यदर्पणः, पञ्चमः परिच्छेदः
५. ध्वन्यालोकः, प्रथम उद्योतः, का.सं.०७
६. साहित्यदर्पणः, पञ्चमः परिच्छेदः, का.सं.०२
७. ध्वन्यालोकः, प्रथम उद्योतः
८. ध्वन्यालोकः, प्रथम उद्योतः का.सं.१२
९. साहित्यदर्पणः, पञ्चमः परिच्छेदः

पाणिनीया
ISSN-2321-7626
Vol. XXIV, Year VI
विक्रमाब्दः २०७६
ज्येष्ठ-श्रावणमासाङ्कः
मई-जुलाई 2019

# व्याकरणनये वाक्यलक्षणपरिष्कारः

**अमित शर्मा**

वैयाकरणसम्प्रदाये वाक्यस्फोटस्यैव बोधकत्वं स्वीक्रियते, तत्र प्रमाणं "वाक्यस्फोटो मुख्यस्तस्यैव लोकेऽर्थबोधकत्वात् तेनैवार्थसमाप्तेश्चेति"[१] इति नागेशवचनम्। अतः वाक्यस्वरूपं तल्लक्षणञ्च निरूप्यते।

नैयायिकाः कथयन्ति "पदसमूहो वाक्यमर्थसमाप्तौ"[२] इति। नाम आकाङ्क्षायोग्यतासन्निधिमतां पदानां समूहः । अत्र मीमांसकाः वर्णयन्ति "समभिव्याहारो वाक्यम्"[३] समभिव्याहारो नाम पूर्वापरिभावेन सहोच्चारणम् यथा " यस्य पर्णमयी जुहुर्भवति न पापं श्लोकं श्रृणोति"[४] इति । ते वाक्यस्वरूपं प्रदर्श्य विभागं प्रदर्शयन्ति – लिङ्गादिपदघटितं वाक्यं द्विविधम् विधिः निषेधश्च । तत्र विधिः 'स्वर्गकामो यजेत' इति वाक्यम्। निषेधास्तु कलञ्च न भक्षयेत् न सुरां पिबेदित्यादि वाक्यम् ।

वैयाकरणानां मते वाक्यस्वरूपे वैलक्षण्यं किञ्चिद् । ते लौकिकवाक्यत्वं, स्वशास्त्रकार्योपयोगिवाक्यत्वञ्च भिन्नमामन्ति। तत्प्रकरणम् प्रतिपाद्यते – "समर्थः पदविधिः"[६] इति सूत्रे समासवाक्ययोः वृत्तिवाक्ययोः वैजात्यं प्रदर्शनार्थं लक्षणं वाक्यस्यावश्यकम् इति धिया भगवता महाभाष्यकृता बहूनि लक्षणवाक्यानि प्रदर्श्य तत्र तत्र पूर्णतोषमलभमानः परेषां व्युत्पत्तिसिद्धये स्मृतस्य उपेक्षानर्हत्वात् वाक्यस्य लक्षणम् आह – "एक तिङ् वाक्यम्"[७] वक्तव्यम् ।

तत्र भगवतः महाभाष्यकारस्य 'समर्थः पदविधिः' इति सूत्रम् व्याख्यातुं प्रवृत्तस्य अकस्मात् कस्माद्धेतोर्वाक्यलक्षणतत्प्रयोजनान्वाख्याने प्रवृत्तिरिति जिज्ञासा नैसर्गिकी तां निवर्तयितुमाह कैयटः "नानाकाराकान्निघातादिनिवृत्तये क्वचित्प्रवृत्तये च

अतिथि व्याख्याता, व्याकरणविभागः, महर्षिपाणिनिसंस्कृतएवंवैदिकविश्वविद्यालयः, उज्जयिनी (म.प्र.)

समानवाक्ये निघातयुष्मदस्मदादेशाः वक्ष्यन्ते। तत्र लौकिकवाक्यग्रहणनिषेधार्थवाक्यं परिभाष्यते[८] इति।

अत्रैव नागेशेन सम्यगालोच्य प्रतिपादितम – तथाहि ''वाक्यलक्षणस्य असङ्गतिमाशङ्क्यआह नानेति। नद्या तिष्ठति कूले इत्यादौ। अत्र हि असामर्थ्यान्न प्राप्नोति। यथा कथञ्चिद् सामर्थ्यग्रहणे तु अयं दण्डो हरानेनेत्यादौ अपि स्यात् इति भावः। लौकिकेति सुप्तिङन्तचयो वाक्यम् इत्यादि''[९]।

अस्य सर्वस्य विवरणस्याशयः इत्थम् – भगवान् भाष्यकारः नैव विना सङ्गतिम् अनेकानि लक्षणानि प्राह, किन्तु प्रयोजनमुद्दिश्य लौकिकवाक्यलक्षणमात्रेण प्रयोजनस्य असिद्धिदशायां शास्त्रीयं वाक्य लक्षणम् परिभाषणीयम् इति मनसि निधाय। तत्र महाभाष्ये 'आख्यातं साव्ययकारकं विशेषणं वाक्यम्' इति प्राह। साव्ययम् उच्चैः पठति इति। सकारकम् – ओदनं पचति।

कारकविशेषणम् – ओदनं मृदु विशदं पचतीति। अपर आह ''आख्यातं सविशेषणं इति। इत्वेव सर्वाणि एतानि विशेषणानि इत्येवं रूपेण वाक्यसमूहेन वाक्यस्य विविधानि लक्षणानि अभिधाय ततो भगवता महाभाष्यकृता लक्षणम् – 'एकतिङ वाक्यम्'।

इदमेव महाभाष्ये वाक्यलक्षणप्रस्तावे अन्तिमं लक्षणम्। परञ्च अस्य लक्षणस्य अन्तिमे सिद्धान्तितत्वेन स्वीकृतेऽपि न दोषनिस्तारः भाष्यविरोधश्च। तत्रेदं लक्षणमभिधाय उदाहरणरूपेण महाभाष्ये निगदितम् –ब्रूहि ब्रूहि।

यदि हि एकतिङवाक्यसंज्ञकं भवति इति उच्यते तर्हि नात्र वाक्ये एकतिङ प्रत्युत द्वितिङ्घटितं वाक्यमिदम् अतः अत्र लक्षणस्य असङ्गतिः। तस्य समाधानाय सर्वैरपि प्रयत्नः कृतः तद् क्रमशः प्रतिपाद्यते –

'ब्रूहि ब्रूहि'' इत्यत्र वाक्यत्वेन अभिमतस्य भाष्यकारस्योदाहरणस्य अनुपत्तिः स्यात् अतः कैयटः परिष्करोति– 'अत्र एक शब्दः समानवचनः न तु संख्यावाची। बहुव्रीहिश्चायम् ब्रूहि ब्रूहि देत्त इत्यत्र वाक्यत्वात् आमन्त्रितनिघातः सिद्धयति इति।[१०]

अत्र नागेशभट्टः विवृणुते – एकतिङ्वाक्यं नाम एकतिङ्तघटितम् इत्यर्थः। अत्र घटितत्वञ्च व्यपदेशिवद् भावनातिदिष्टं ग्राह्यम् तेन पचतीत्येतन्मात्रस्य न वाक्यत्वम्। इदं स्वशास्त्रकार्योपयोगी एकवाक्यत्वलक्षणम्। तेन पश्य मृगो धावति इत्यादौ लौकिकैकवाक्यस्यपि नाऽव्याप्तिः। समर्थसूत्रे भाष्ये स्पष्टमेतत्। अत एव 'तिङतिङ' इत्यत्र एतदाश्रित्य ' अतिङ् इति प्रत्याख्यातं भाष्ये।[११] लौकिक वाक्यत्वञ्च

'सुप्तिङ्चयो वाक्यम्' क्रिया वा कारकान्विता[१२] इति।

अस्याशयः अत्र सुप्पदम् सुबन्तपरम् एवं सुब्विशिष्टतिङन्तम् इत्यत्रापि सुबन्तचयो इत्यस्योदाहरणम् देवत्तेन शयितव्यम् । यदा तु अस्तिर्भवतिपरः सर्वत्राप्रयुज्यमानोऽप्यस्ति इति वचनाद् अस्ति इति क्रियापदाध्याहरेण वाक्यत्वमुच्यते तदा 'रूढानि' इत्यर्थेन सुबन्तचयस्य वाक्यत्वाभावः। तर्हि उच्यते अत्र ईदृशः विग्रहः कर्त्तव्यः ''सुप् च तिङ् च सुप्तिङौ, सुप्तिङौ अन्ते यस्य स चासौ चयः समुदायः इति[१३]। तेन अदोषात् । अत्र दण्डिभट्टः न्यायशैलीमवलम्व्य लक्षणम् परिष्करोति तद्यथा ननु एकतिङन्तघटितत्वरूपैकवाक्यत्वस्वीकारे ''त्वया शयितव्यम् इत्यस्यैकवाक्यत्वानापत्तिः। त्वया शयितव्यम् इति रामो वदति–इत्यत्र एकवाक्यत्वापत्तिश्चेति चेन्न मुख्यविशेष्यताप्रयोजकत्वयोग्यक्रियाप्रतिपादकत्व–प्रकारकतात्पर्यविषयपदाघटकपदद्वयाघटितत्वरूपतत्वस्वीकारेण 'त्वया शयितव्यम्' इत्यत्र मुख्यविशेष्यताप्रयोजनकत्वयोग्या या शयनक्रिया, तादृशशयनक्रिया–प्रतिपादकत्वेन तात्पर्यविषयीभूतं यत्पदम् शयितव्यम् इत्येकं पदं, न तु तादृशं पदद्वयमत्रास्तीति तादृशपदद्वयाघटित्वं त्वया शयितव्यमिति वाक्यस्य इति लक्षणसमन्वयः । 'ब्रूहि ब्रूहि राम' इत्यत्र अव्याप्तिवारणार्थं पदाघटकत्वमितिनिवेशः तल्लक्षणपरिष्करणेऽपि पुनरपि दूषणं – 'ग्रामं गच्छ घटः' इत्यस्य निरुक्तदिशा तत्वापत्तिरिति वाच्यम्। तर्हि उच्यते परस्परनिरूप्यनिरूपकभावापन्नविषयता–कपदाघटितत्वम् इति विशेषणदानेन अदोषात्।[१३] विस्तरं शब्देन्दुशेखरस्य व्याख्यायां द्रष्टव्यम् । इत्थञ्च 'एकतिङ् वाक्यं' इति महाभाष्यवाक्यं निर्दुष्टं व्याकरणशास्त्रे तदनुसारेण व्यवस्थेति सिद्धम् ।

**सन्दर्भ सूची**


१. परमलघुमञ्जूषा शक्तिप्रकरणे पृष्ठ संख्या – ०७
२. न्यायभाष्यं सूत्रसंख्या – २/२/६१
३. न्यायकोशः पृ.सं. – ७३०
४. समर्थः पदविधिः, महाभाष्ये
५. अर्थसंग्रहः पृ. सं. ३०७
६. पाणिनि अष्टाध्यायी – २/१/२
७. महाभाष्यम्
८. महाभाष्यनिगूढाकूतयः पृ.सं. – १५६
९. समर्थः पदविधिः नागेशकृते उद्योते
१०. समर्थः पदविधिः इति सूत्रे कैयटव्याख्यप्रदीपे
११. लघुशब्देन्दुशेखरः हलन्तपुँल्लिङ्गे प्रकरणे पृ.सं. – ४५०

१२. अमरकोषप्रथमकाण्डे शब्दादिवर्गे द्वितीयश्लोकः

१३. लघुशब्देन्दुशेखरस्य ज्योत्सनाटीकायां।

१४. लघुशब्देन्दुशेखरस्य अभिनवचन्द्रटीकायाम्।

**सहायकग्रन्थसूची**


१. पाणिनी अष्टाध्यायी, वक्रतुण्डप्रकाशनम् श्रृङ्गेरी २०११ प्रकाशनवर्षम्

२. महाभाष्य, प्रतिभाप्रकाशनदिल्ली १९९९, प्रकाशनवर्षम्

३. न्यायकोषः, चैखम्भा सुरभारतीप्रकाशनम्, वाराणसी, २०१५ प्रकाशनवर्षम्

४. महाभाष्यनिगूढ़ाकूतपः, सम्पूर्णानन्द विश्वविद्यालयः वाराणस, १९७८ प्रकाशनवर्षम्

५. लघुशब्देन्दुशेखरः, चैखम्बा सुरभारतीप्रकाशनम्,वाराणसी, २०१३ प्रकाशनवर्षम्

६. परमलघुमञ्जूषा, चैखम्बा, सुरभारती प्रकाशन वारणसी, २०११ प्रकाशनवर्षम्

७. षड्दर्शनसूत्रसंग्रहः, चैखम्बा संस्कृतप्रतिष्ठानम् दिल्ली, २०१२ प्रकाशनवर्षम्

८. अमरकोषः, मोतीलाल बनारसीदास वाराणसी, २००२ प्रकाशनवर्षम्

**पाणिनीया**
**ISSN-2321-7626**
Vol. XXIV, Year VI
विक्रमाब्दः २०७६
ज्येष्ठ-श्रावणमासाङ्कः
मई-जुलाई 2019

# व्याकरणस्य महत्वम्

**सरला आर्या**

व्याकरणशास्त्रमनादिकालाद् भारतीयचिन्तनस्य अनिवार्यमङ्गमासीत् । किन्तु महर्षिपाणिनिप्रतिपादितकेचननियमाः संस्कृतसीमानमुल्लङ्घ्य विश्वासु भाषासु सन्निविष्टाः संदृश्यन्ते। भाषाविकाससिद्धान्तज्ञोयं महर्षिः, अत एव विभाषा, अन्यतरस्यां, बहुलं, वा, छन्दसि इति अनेकविकल्पार्थकशब्दानां सूत्रेषु प्रयुज्य शब्दबाहुल्यसिद्धिं स्वीचकार। भामहोवदत् यत् एकस्मिन् जन्मनि सम्पूर्णपाणिनीय व्याकरणस्य विवेचनं न केनापि साध्यम्। भट्टि महाकविः स्वीयमहाकाव्ये व्याकरणस्वरूपं प्रतिपादयति।

**दीपतुल्यः प्रबन्धोयं शब्दलक्षणचक्षुषाम् ।**
**हस्तामर्श इवान्धानां भवेद् व्याकरणादृते।।** भट्टि. २२.३३

व्याकरणस्य इतरप्रधानपक्षस्तु सैद्धान्तिकपक्षः तत्र अष्टाध्यायीसूत्रस्थ– अनभिव्यक्तसिद्धान्तान् महर्षिः पतञ्जलिः सरलस्पष्टव्याख्यानशैलीमनुसृत्य व्याख्याञ्चकार। तस्य व्याख्यानेन एव व्याकरणस्यपूर्णता प्रतिष्ठामगात् । पतञ्जलेः धारणां आचार्यः भर्तृहरिः दार्शनिकरूपं प्रददौ तथा शब्दस्वरूपस्यतात्विकज्ञानमिदं मोक्षदायकमिति उक्तं यथा –

**इयं सा मोक्षमानानामजिह्मा राजपद्धतिः।**

आचार्यः भर्तृहरिः शब्दतत्वव्याख्याने वैय्याकरणतर्कानातिरिच्य व्याकरणसिद्धान्तविकासे सहायकानि अन्याचार्याणां सम्मतान्यपि सादरं स्वीचकार। उक्तञ्च –

**प्रज्ञा विवेकं लभते भिन्नैरागमदर्शनैः।**
**कियद्वा शक्यमुन्नेतुं स्वतर्कमनुधावता।।**

विभिन्नागमसिद्धान्तव्याख्यानेन प्रज्ञासु विवेकः जागर्ति तेन स्वीयसिद्धान्तविकासक्रमे न कोपि व्यवधानं समुतपद्यते। एतैराचार्यैः प्रतिपादितसिद्धान्ताभिव्यक्तीकरणेनैव व्याकरणं

शोधच्छात्रा, राष्ट्रियसंस्कृतविद्यापीठम् , तिरुपतिः (आं.प्र.)

'सर्ववेदपार्षदं हीदं शास्त्रम्' इति वक्तुं शक्यते।

भूतं भव्यं भविष्यं च सर्वं वेदात् प्रसिद्ध्यति इति भारतीयमान्यतानुसारम् अखिलज्ञानराशिः वेदेषु संवर्तते। स्मृतिशास्त्रमिदम् इत्युक्त्वा व्याकरणस्य वेदमूलकतामुच्यते। राजशेखरः काव्यमीमांसायामुवाच –

**व्याकरणस्मृतिनिर्णीतः शब्दः** । का. मी. पृ. ४६

वेदविद्भिः आचार्यैः शब्दनिबन्धनत्वात् अशब्दनिबन्धनत्वात् स्मरणमूलकत्वात् दृष्टादृष्टप्रयोजनत्वात् अनेकरूपेषु वेदानामाश्रयत्वात् वैदिकलिङ्गाधारेण स्मृतयः उपनिबध्यन्ते इत्युक्तं –

**स्मृतयो बहुरूपाश्च दृष्टादृष्टप्रयोजनाः।**
**तमेवाश्रित्य लिङ्गेभ्यो वेदविद्भिः प्रकल्पिताः।।** वा. प.१७

समस्तस्मृतयः वेदमूलका इत्युक्त्वा आचार्येण भर्तृहरिणा प्रतिपाद्यते यत् तर्कापेक्षया आगमस्य प्रबलत्वात् भ्रम–प्रमाद–विप्रलिप्सादिदोषैरनाक्रान्तस्य अकृतक–अपौरुषेय–आम्नायरूपवेदशास्त्रस्य तथा पूर्वपूर्वस्मृतिमूलकव्याकरणस्मृतीणां प्रमाणमाश्रित्य शिष्टाः पाणिन्यादयः आचार्याः शब्दानुशासनं चकार यथोक्तम् –

**तस्मादकृतकं शास्त्रं स्मृतिं च सनिबन्धनाम्।**
**आश्रित्यारभ्यते शिष्टैः शब्दानामनुशासनम्।।** वा. प. १.४३

श्रुतयस्तु आनाद्यवच्छिन्नाः प्रवाहपरम्पराविच्छेदशून्याः अकर्तृकाः । स्मृतयस्तु शिष्टजनैः निबद्ध्यन्ते अतः सनिबन्धनाः, किन्तु स्वरूपतः उपनिबध्यमानाः अपि प्रवाहपरम्परया विच्छिन्नाः नैव भवन्ति । उक्तञ्च –

**अनादिमव्यच्छिन्नां श्रुतिमाहुरकर्तृकाम्।**
**शिष्टैर्निबध्यमाना तु न व्यवच्छिद्यते स्मृतिः।।**वा. प. १.१४४

आचार्यः पतञ्जलिः व्याकरणस्वरूपं तस्योपयोगिताञ्च विस्तरेण निरूपयति यथा –

**वर्णज्ञानं वाग्विषयो यत्र च ब्रह्म प्रवर्तते।**
**तदर्थमिष्टबुद्ध्यर्थं लघ्वर्थं चोपदिश्यते।।** म.भा.द्वि.आ. पृ. १२६

अक्षरतत्वं ब्रह्मतत्वं प्रतिभासाक्षात्करणाय च व्याकरणस्य आवश्यकतेति स्वीकृत्य व्याकरणशास्त्रमभीष्टसिद्धेः सरलसाधनमिति मन्यते । अन्यच्च सत्यासत्यविवेचनाय, प्रकृतिप्रत्ययविभागज्ञानपूर्वकलौकिकवैदिकसमस्तशब्दानां स्वरूपज्ञानाय व्याकरणस्य अनिवार्यता अपरिहार्या। शब्दस्वरूपावबोधकत्वात् व्याकरणं शब्दज्ञानेन अज्ञानकृतपापं निवर्त्य अदृष्टस्योत्पादकम् इति सिद्ध्यति।

आचार्यः पतञ्जलिः व्याकरणलक्षणं मनुते व्याक्रियते शब्दा अनेन अस्मिन् वा, अत्र भर्तृहरिणा उच्यते – व्याकरणेन शब्दानां प्रवृत्तिनिमित्तव्याख्यानम् आचार्यैरभीष्टम् इति ।

तत्रायं व्याकरणशब्दः किं ब्रूते इति प्रश्ने कृते उच्यते यत् –

**व्याक्रियते इत्यनेन द्वारेण शब्दप्रवृत्तिनिमित्तमाचिख्यासन्नुपन्यासं करोति ।**

**शब्दो हि कश्चित् तुल्यरूपः प्रवर्तमानो भिन्ननिमित्तः परस्परमनपेक्षमाणः प्रवर्तते।** म.त्रि. १.१.१

एतत्तुल्यशब्दस्य प्रवृत्तिनिमित्तस्य व्याख्या व्याकरणेन क्रियते। शब्दप्रवृत्तेः तत्वज्ञानेन शब्दब्रह्मणः उपलब्धिर्भवति । रसो वै सः रसं ह्येवायं लब्ध्वानन्दी भवति। (तै. उ.२.७.२) इत्युक्तयनुसारं तस्य शब्दब्रह्मणः रसास्वादमनुभूय भर्तृहरिः व्याकरणस्य महत्वपूर्णस्थानं प्रतिपादयति यथा –

**तस्य प्रवृत्तितत्वज्ञस्तद्ब्रह्मामृतमश्नुते।** वा. प.१.१३१

हरिणा उच्यते यत् वैदिकलौकिकशब्दानां स्वरूपसंस्कारः व्याकरणेनैव संभवति। अतः शब्दस्वरूपः वेदब्रह्मणः साक्षादुपकारकः तथा च ब्रह्मचर्याधःशयन चान्द्रयणादितपोभ्योपि उत्तमं तप इति, अत एव पदपदार्थविवेचनादिदृष्टस्यपरमार्थाद्यदृष्टस्य प्रतिपादकं व्याकरणं वेदस्य प्रधानमङ्गमनुते –

**असन्नं ब्रह्मणस्तस्य तपसामत्तमं तपः।**
**प्रथमं छन्दसामङ्गं प्राहुर्व्याकरणं बुधाः।।** वा. प. ११

लक्षणप्रपञ्चेन व्याकरणं वर्णपदवाक्यरूपसूक्ष्मवाण्याः परमसारभूतस्य पवित्रतम–प्रकाशस्वरूपस्य शब्दब्रह्मणः तात्विकज्ञानस्य सुगमसाधनम्। यथोक्तम् –

**प्राप्तरूपविभागाया यो वाचः परमो रसः।**
**यत्पुण्यतमं ज्योतिःस्तस्य मार्गोयमाञ्जसः।।** वा.प. १२

अत्र आञ्जस इत्यस्यार्थः लघुतमः, ऋजुतमः इति भर्तृहरिराह यथा – व्याकरणं लघुरुपायःशब्दज्ञानं प्रति, अन्य उपायः एव न संभवति इति किन्तु केचन व्याख्याकाराः आञ्जस इत्यस्य अर्थ अन्धकारमय इति कुर्वन्ति। तदा प्रश्नः समुत्पद्यते लघुपथः अन्धकारपूर्णः कथं भवतुं शक्रोति इति प्रश्ने कृते अचार्येण हरिणा समाधत्ते यथा–

**वैकृतं समतिक्रान्ता मूर्तिव्यापारदर्शनम्।**
**व्यतीत्यालोकतमसि प्रकाशं यमुपासते।।**

यथा मायामुल्लङ्घ्य ब्रह्मप्राप्तिः तथैव मूर्तिव्यापारे निमग्नं वैकृतं व्याकरणमतिक्रम्य एव प्रकाशरूपपरब्रह्मणः दर्शनम् । अर्थात् अन्धकारमिव दृश्यमानं व्याकरणं प्रकाशरूपंपरब्रह्माणं प्रापयति इति । (व्याकरण की दार्शनिक भूमिका पृ. ४५)

यस्य शब्दस्यस्वरूपज्ञानं भवति ते शब्दाः एव अर्थप्रवृत्तिविवक्षायाः कारणभूताः भवन्ति यथा इन्द्रियेण अर्थप्राप्त्यर्थं विषयविशेषे इन्द्रियविशेषस्य प्रयोगः तथैव अर्थविशेषस्य प्रतिपत्तये योग्यशब्दात्तस्यार्थविवक्षा विधीयते। एवं शब्दस्वरूपबोधेन व्याकरणं तस्यार्थबोधस्य

योग्यतां स्पष्टीकरोति।

**अर्थप्रवृत्तितत्वानां शब्दा एव निबन्धनम्।**
**तत्वावबोधः शब्दानां नास्ति व्याकरणादृते।।** वा. १.१३

शब्दार्थसम्बन्धशब्दप्रवृत्तिनिमित्तज्ञानम् व्याकरणसाध्यमेव भवति अतःव्याकरणं विना उपर्युक्तज्ञानं नैव संभवति –

**शब्दार्थसंबन्धनिमित्ततत्त्वं वाच्यविशेषेपि च साध्वसाधून्।**
**साधुप्रयोगानुमिताँश्च शिष्टान् न वेद यो व्याकरणं न वेद।।**

अनेन व्याकरणज्ञानेन मनुष्याः व्यवहारयोग्यतां प्राप्नुवन्ति ततः पश्यन्तीनामप्रतिभा प्राप्यते ततः पराप्रकृतेर्ज्ञानं भवति। पराप्रकृतौ समस्तविकाराणां प्रतीतिः परिसमाप्यते एवं व्याकरणज्ञानेन निःश्रेयसः प्राप्तिः। अस्मिन् प्रसङ्गे यथा आयुर्वेदशास्त्रं शारीरिकदोषनिवारकमिति स्वीकुर्वन्ति तथैव व्याकरणं वाण्याः सकलदोषापहारकमिति प्रतिपादयन्ति, सकलविद्यासु पवित्रतमविद्या इति उद्घोषयन्ति च यथा –

**तद्द्वारमपवर्गस्य वाङ्मलानां चिकित्सितम् ।**
**पवित्रं सर्वविद्यानामधिविद्यं प्रकाशते ।।** वा. प.१.१४

उपर्युक्तां धारणां परिपोषयन्नाह –

**आपः पवित्रं परमं पृथिव्यामपां पवित्रं परमं च मन्त्राः।**
**तेषाञ्च सामर्ग्यजुषां पवित्रं महर्षयो व्याकरणं निराहुः।।**

**अस्य निष्कर्षः –** व्याकरणस्य लक्ष्यं पदपदार्थज्ञानमेव न, अपितु प्रकाशान्धकारसीमानमुल्लङ्घ्य तत्रस्थ भावबोधसम्प्राप्तिरिति।

**ग्रन्थसूची –**

१. भट्टिकाव्यम् – महाकविः भट्टिः
२. महाभाष्यम् – महर्षिः पतञ्जलिः
३. वाक्यपदीयम् – आचार्यः भर्तृहरिः
४. काव्यमीमांसा –राजशेखरः

पाणिनीया
ISSN-2321-7626
Vol. XXIV, Year VI
विक्रमाब्दः २०७६
ज्येष्ठ-श्रावणमासाङ्कः
मई-जुलाई 2019

# नैषधमहाकाव्ये हर्षस्य पाण्डित्यम्

डॉ. शुकदेव वाजपेयी

श्रीहर्षविरचितनैषधीयचरितस्य विशिष्टमेकं स्थानं विद्यते। **नैषधं विद्वदौषधम्** , महाकविना संस्कृतसाहित्यस्य सवृद्ध्या स्वीयेष्टदेव्या अपि सपर्या विहिता अस्ति। संस्कृतवाङ्मये उत्कृष्टमहाकविषु श्रीहर्षस्य गणनेदानीं विद्यते। तद्द्वारा विरचिते महाकाव्ये – नैषधीयचरिते काव्यप्रेमिजनानामभिमानं दृष्यते । कालिदास–बाणभट्ट–भवभूति–भारवि–माघादिभिः संस्कृतस्य मूर्धन्यमहाकवीनां परम्परायां श्रीहर्षस्य नाम सगौरवं सास्मर्यते । नैषधीयचरितस्य द्वाविंशतिसर्गे स्वयं स्वीकृतिपरं पद्यं स्वस्मिन् विषये श्रीहर्षः लिखति –

**ताम्बूलद्वयमासनं च लभते यः कान्यकुब्जेष्वरात् ,**
**यः साक्षात्कुरुते समाधिषु परं ब्रह्मप्रमोदार्णवम् ।**
**यत्काव्यं मधुवर्षिर्धर्षतिपरास्तर्केषु यस्योक्तयः,**
**श्रीश्रीहर्षकवेः कृतिः कृतिमुदे तस्याभ्युदीयादियम् ।।**

अनेन एतदपि स्पष्टं भवति यत् काव्यकुब्जाधिपतेः सभायामयं सम्मानातिषयितः कविरासीत् । श्रीहर्षस्य भारती यथा काव्यरचनायां सहायिका विद्यते तथैव कर्कशतर्कावतरणेऽपि सहायिकास्ति । स्वयं महाकविः निवेदयति –

**साहित्यं सुकुमारवस्तुनि दृढन्यायग्रहग्रन्थिले ।**
**तर्के वा मयि संविधातरि समं लीलायते भारती।।**

महाकविरयं श्रेयःप्रेयश्च उभयोरपि समत्वं व्यनक्ति । यद्यपि श्रेयः जीवनस्य

लक्ष्यमस्ति तथापि प्रेयसः समुचितप्रयोगेन विना तस्य प्राप्तिरसम्भवैव । श्रेयसः प्रेयसः संगम एव संसारः विद्यते ।

नलदमयन्त्याः कथा भारतीयजीवनस्य प्रसिद्धा अनुकरणीया च कथा विद्यते। एषा नैव केवला सुधावधीरिणी, अपितु कलिनाशिनी अपि अस्ति, प्रोक्तं तथाहि –

**कर्कोटकस्य नागस्य दमयन्त्या नलस्य च ।**
**ऋतुपर्णस्य राजर्षेः कीर्तनं कलिनाशनम् ।।**

विद्वांस जनाः महाकाव्यस्यास्य स्त्रोत्ररूपे प्रयोगं विधाय कृतकृत्यताया अनुभवं कुर्वन्ति। कवि श्रीहर्षः नलदमयन्त्याः धर्मादिदृढतायाः क्वचिदपि विच्छेदं न कर्तुमैक्षत् तयोः धर्माचरणं तत्र न क्वचित् जडीभूतं दृश्यते अपितु गतिशीलमिव दृश्यते –

**निषिद्धमप्याचरणीयमापदि क्रियासती नार्वात यत्र सर्वथा।**[१]

नैषधीयचरितस्य प्रधानपात्रभूतौ दमयन्तीनलावेव स्तः । प्रतिनायकरूपे इन्द्र-अग्नि-यम-वरुणादयोऽपि सन्ति ये कथायामग्रे नलस्य सहायकरूपेण दृश्यन्ते। वस्तुतः नलोपख्यानस्य प्रतिनायकस्तु कलिरेव, यः महाकविना तत्र गौणीकृतः ।

नाट्यशास्त्रस्य रचयितुः भरतमुनेरसनुसारं सुखमय मूलभूताः स्त्रियः नानाशीलाः भवन्ति। तासां स्वभावः भिन्नभिन्नः भवति। एतासां प्रकृत्यानुसारेण भेदत्रयं भवति –

१. कुलीनाः स्त्रियः (आभ्यन्तराः)

२. बाह्याः स्त्रियः (वेश्याः)

३. कृतशौचाः (बाह्याभ्यन्तरे)

नैषधीयचरितस्य प्रधाननायिका दमयन्ती प्रथमकोः कुलीना नायिका अवलोक्यते। स्वकीये कौमार्यकाले सा अन्या (अनूढा परकीया) अस्ति, विवाहोपरान्तं सा 'स्वा' (विवाहिता स्वीया) भवति। नायकसम्बन्धेन सा आरम्भे विरहोत्कण्ठिता दृश्यते किन्तु विवाहोपरान्तं सा प्रियस्यातिप्रिया विद्यते। नैषधे दमयन्ती रूपगुणशीलादिदृष्ट्या विश्वे सर्वोत्कृष्टत्वरूपेण चित्रिता अस्ति तस्या नाम एव दमयन्ती अतः संजातः यतोति सा स्वीयया लोकोत्तरतनुश्रिया त्रिलोकिनः सुन्दरीणां सौन्दर्याभिमानं दमनं करोति –

**भुवनत्रयसुभ्रुवामसौ दमयन्ती कमनीयतामदम् ।**
**उदियाय यतस्तनुश्रिया दमयन्तीति ततोऽभिधां दधौ ।।**[२]

सा नलसदृशा विद्यते हंसदूतेनापि तत्र कथित –

**धन्यासि ! वैदर्भि ! गुणैरुपारैर्यथा समाकृश्यत नैषधोऽपि ।**
**इतः स्तुतिः का खलु चन्द्रिका या यदब्धिमप्युत्तरलीकरोति ।।**[३]

अनेकेषु स्थलेषु नैषधे तस्याः विविधस्वरूपाणां, तनुश्रियः, तथांगसुषमाणां विशदचित्रणं, कविहर्षेण स्वपाण्डित्यपूर्णप्रयासेन कृतं विद्यते, येन सा श्रेष्ठा आदर्शा च नायिका सिद्धा भवति। अपि च नलं प्रति तस्या एतावदनुरागं दृश्यते यत् विश्वे नलस्य समक्षं सा कमप्यन्यं महत्व नैव ददाति, न च मान्यत्वं ददाति। तस्याश्चित्तन्तु केवलं नलमेव कामयते –

**चेतो नलं कामयते मदीयम्**

भारतीयस्नेहस्य सकला छटा यदि क्वचित् द्रष्टुं प्राप्नोति तर्हि श्रीहर्षस्य नैषधे नलदमयन्त्याः प्रणयप्रसंगे एव। तदा दमयन्ती स्वर्णपुरीलंकामपि न कदाचित् अभिलशति–

**चेतो न लंकामयते मदीयम्**

अतः यं नलं सा वांछति तं कस्यामपि स्थितौ सा प्राप्तुकामास्ति अपि च तस्य नलस्याप्राप्तौ सा अनले प्रविष्टुकामापि संजायते –

**चेतोऽनलं कामयते मदीयम्**

विवाहोपरान्तं तस्यानुरागं पूर्णतामवाप्नोति अपि च सा नरराजनलं तृतीयपुरुषार्थवारिधौ संतारिका सती तरी (नौका) इव भवति ।

ज्ञानाधिकारिणः यावन्ति लक्षणानि शास्त्रेषु वर्णितानि सन्ति तानि गहनतया नलदमयन्त्योश्चित्ते विद्यमानानि सन्ति – **दमयति नाशयति अमंगलादिकमिति दमयन्ती** – एषः व्युत्तपत्तिपरकः अर्थोऽपि सार्थक एव । कस्या अपि स्त्रियः नाममात्रमपि चित्तं विकारयति '**यस्या नामापि संहृद्यादि**' पुनस्तस्याः दर्शनस्य चिन्तनस्य अनुसंधानस्य का कथा ? अतः दमयन्त्याः ध्यानं मनोविकाररूपे विद्यमानस्य अमंगलस्य शमनकरणे समर्थं विद्यते अत एव दमयन्ती उच्चकोटियुतासु नायिकासु

प्रमुखं स्थानं भजते –

**कर्कोटकस्य नागस्य दमयन्त्या नलस्य च ।**
**ऋतुपर्णस्य राजर्षेः कीर्तनं कलिनाशनम् ।।**

एवं च वयं पश्यामो यत् श्रीहर्षेण स्वकीयं अपूर्वं पाण्डित्यं नैषधीयचतिवर्णने प्रदर्शितमस्ति। अद्भुतं प्रेम नलदमयन्त्योः मध्ये वयं लोकयितुं शक्नुमः । श्रेष्ठजीवनस्य च तत्रावगतिर्दृश्यते । तस्मादेव नलस्य नामस्मरणमपि स्वतः मंगलमाचरति –

**पुण्यश्लोको नलो राजा पुण्यश्लोको युधिष्ठिरः ।**
**पुण्यश्लोका च वैदेही पुण्यश्लोको जनार्दनः ।।**

अत्र श्रीहर्षस्य एव तन्माहात्म्यं यत् सः तच्चरितवर्णनेन न केवलं नलं यशस्यति अपितु स्वकीयमपि यशः चिरस्थायि करोति ।

## सन्दर्भ


१. नै. ९.३६
२. नै. ९.३६
३. नै. ३.११६

पाणिनीया
ISSN-2321-7626
Vol. XXIV, Year VI
विक्रमाब्दः २०७६
ज्येष्ठ-श्रावणमासाङ्कः
मई-जुलाई 2019

# मिहिरोक्तस्य 'मत्स्यौ घटीति' पद्यस्य फलचिन्तनोपयोगः

**डॉ. रमानन्दभट्टः एन्**

**शरदिन्दुविकासमन्दहासां स्फुरदिन्दीवरलोचनाभिरामाम् ।**
**अरविन्दसमानसुन्दरास्यामरविन्दासनसुन्दरीमुपासे ।।**

यच्छास्त्रं सविता चकार विपुलैः स्कन्धैस्त्रिभिर्ज्योतिषां
तस्योच्छित्तिभयात् पुनः कलियुगे संसृत्य यो भूतलम् ।
भूयः स्वल्पतरं वराहमिहिरव्याजेन सर्वं व्यधात्
इत्थं यं प्रवदन्ति मोक्षकुशलास्तस्मै नमो भास्वते।।[१]
ज्योतिश्शास्त्रमिदं विधाय विपुलं त्रिस्कन्धभिन्नं पुरा
लोकानां मतिमान्द्यतः कलियुगे तत्पातभीत्या पुनः ।
स्वल्पं तत्सकलं ततो रचितवान् आदित्यदासात्मजो
भूत्वा यो मिहिरो वराहमिहिरो नाम्ना नमस्कुर्महे ।।[२]

वेदस्य चक्षुर्भूतस्य ज्योतिश्शास्त्रस्य लक्ष्यमादेश एव । **'ज्योतिश्शास्त्रफलं पुराणगणकैरादेश इत्युच्यते'**[३] इत्याह भास्करः । लोकानामादेशार्थमिदं शास्त्रं प्रवृत्तमिति प्राचीनगणकानां मतिः । स चादेशो विविधः । वेदोक्तानां निखिलानां कर्मणां योग्यकालदर्शमादेशः । प्रत्येकं पुरुषस्य पूर्वार्जितकर्मणः परिपाकोऽस्मिन् जन्मनि कथं भवतीति जन्मकालमाश्रित्य फलनिर्देश आदेशः । आरूढादिकमाश्रित्य प्रच्छकस्य मनोगतविषयस्य प्रश्नरूपस्य तत्कालशकुनादीनां साहाय्येन चोत्तरकथनमप्यादेशः । विवाहादिशुभकर्मणां वा सुरप्रतिष्ठादिविशेषाणां यात्राया वा मुहूर्तशास्त्रद्वारा कालनिर्देशोऽप्यादेशशब्दवाच्यः । स चादेशः स्फुटग्रह-स्फुटलग्नादिकमाश्रयते । तत्र लग्नफलस्य स्फुटनिर्देशे राशिस्वरूपं महत्त्वमावहति । अतस्तत्स्वरूपकथनश्लोकमाश्रित्य

किञ्चिदत्र विव्रियते । तदादौ राशिसम्बन्धीनि विवरणानीषदिव विचिन्त्यन्ते ।

ज्योतिश्चक्रस्य द्वादशांशो राशिरित्युच्यते[४] । तदुत्पत्तिस्तु वर्णिता सूर्यसिद्धान्ते –

**अथ सृष्ट्यां मनश्चक्रे ब्रह्माहङ्कारमूर्तिभृत् ।**
**मनसश्चन्द्रमा जज्ञे सूर्योऽक्ष्णोस्तेजसां निधिः ।।**
**मनसः खं ततो वायुरग्निरापो धरा क्रमात् ।**
**गुणैकवृद्ध्या पञ्चैव महाभूतानि जज्ञिरे ।।**
**अग्नीषोमौ भानुचन्द्रौ ततस्त्वङ्गारकादयः ।**
**तेजोभूखाम्बुवातेभ्यः क्रमशः पञ्च जज्ञिरे ।।**
**पुनर्द्वादशधात्मानं विभजेद्राशिसंज्ञकम् ।**
**नक्षत्ररूपिणं भूयः सप्तविंशात्मकं वशी ।।**[५]

अतो राशिचक्रस्य समाना द्वादशभागा एव राशयः । वृत्ते ३६० अंशाः सन्ति । तान् द्वादशभिर्विभज्य प्रत्येकं राशेः ३० अंशाः सम्भवन्ति । त एव राशयः । विषुवत्क्रान्तिवृत्तयोः सृष्ट्यादिसम्पाततः एते स्थिरत्वेन[६] स्थिता इति मुनीश्वर आह –

**विषुवत्क्रान्तिवृत्तैक्यात् पूर्वभागस्थिताः स्थिराः ।**
**मेषाद्या राशयः क्रान्तिवृत्तस्य पूर्वदिक्क्रमात् ।।**[७] **इति ।।**

बृहज्जातके, श्रीसूर्यसिद्धान्ते च क्रमेण '**मेषाश्विप्रथमा नवर्क्षचरणाश्चक्रस्थिता राशयः**'[८], '**पौष्णान्ते भगणः स्मृतः**'[९] इति चोक्तम् । अत आभ्यां राशीनां स्थिरत्वं व्यज्यते । तत्र द्वादशसु राशिषु उत्तरगोले मेषाद्याः षड्राशयः । दक्षिणे तुलादयश्च षडिति ज्ञेयम् ।[१०] ते च राशयः –

**मेषवृषमिथुनकर्कटसिंहाः कन्या तुलाथ वृश्चिकभम् ।**
**धनुरथ मकरः कुम्भो मीन इति च राशयः कथिताः ।।**[११]

पूर्वोक्तवत् एषु राशिषु अश्विन्यादीनि भानि नवनवचरणात्मकानि ज्ञेयानि '**अश्विनी-भरणी-कृत्तिकापादो मेषः .....**' इत्यादिक्रमेण ।

अथैषां राशीनां स्वरूपं कथ्यते मिहिरेण –

**मत्स्यौ घटी नृमिथुनं सगदं सवीणं**
**चापी नरोऽश्वजघनो मकरो मृगास्यः ।**
**तौली ससस्य दहना प्लवगा च कन्या**
**शेषाः स्वनामसदृशाः स्वचराश्च सर्वे ।।**[१२] **इति ।।**

अनेन राशीनां स्वरूपमुक्तम् । तत्रादौ मीनस्य । मत्स्यौ मीन इति तत्स्वरूपम् । मत्स्यादित्यनेन न केवलं मीनद्वयमित्यर्थः किन्त्वन्योन्यं पुच्छाभिमुखं मत्स्यद्वयमित्यर्थो

मीनराशेरुभयोदयत्वात् ।[१३] यतो वक्ष्यति मिहिरो **लग्नं समेत्युभयतः पृथुरोमयुग्मम् इति ।**[१४] अतो मुखपुच्छप्रत्तिबद्धमत्स्यद्वयाकारो मीनराशिरिति वाच्यम् । घटीति कुम्भस्य स्वरूपम् । घटी घटवान् पुरुषः । कुम्भराशेः कुम्भधरत्वेऽपि स च पुरुषः कुम्भधरः स्कन्धविन्यस्तरिक्तघटो ज्ञेयः । अग्रे नृमिथुनं सगदं सवीणमिति मिथुनस्य स्वरूपम् । गदाधारी पुरुषः सवीणा स्त्रीत्यर्थः । गदाधारिणी स्त्री, सवीणः पुरुष इत्यपि शक्यते व्याख्यातुम् । किन्तु स्वभावानुगुणमर्थो ज्ञेयः इत्यतः पुरुषो गदाधारिणी स्त्री च सवीणेत्यवगन्तव्यम् । अत्र गदयायुधविशेषेण, गदेन रोगेण वा सहितः पुरुषो ज्ञेय इत्यपूर्वार्थप्रकाशिकाकारः ।[१५] चापी नरोऽश्वजघन इति धनुषः । चापीः चापवान् धनुष्मानधोऽश्वाकृतिः पुरुषः इति धनुस्स्वरूपं चिन्त्यम् । चापी नरोऽश्वजघन इत्यनेन नात्राश्वारोही चिन्त्यः । अश्वजघनो धनुष्मान् पुरुष एवानेन चिन्त्यः । मकरस्य तु मृगास्यो मकरः । मृगास्यो मृगमुखो मकरः । अत्र विशिष्यास्यग्रहणादास्यं मृगस्याधोभागो मकरस्येति विजानीयात् । तुलायास्तु तौलीति । तौली तुलाधरः पुरुषस्तुलाया आकारः । षष्ठराशेस्तु ससस्य दहना प्लवगा कन्येति । प्लवगा नौस्था धृतेन सस्येनाग्निना च युक्ता कन्येति कन्याराशेराकृतिः । अपूर्वार्थे सस्येन धान्येन युक्तेत्यप्यर्थो गृह्यत। एवं मीनादिशब्दश्रवणमात्रेण यत्स्वरूपं लोकप्रसिद्धं मनसि स्फुरति, तन्न शास्त्र इति विजानन्तो महान्त आचार्याः लोकशास्त्रयोर्भेदो येषां राशीनां तानुक्त्वानुक्तानां स्वरूपं केवलं पदेन कथयति स्वनामसदृशा इति । शेषा मेषवृषभकर्कसिंहवृश्चिकाः स्वनामसदृशाः । लोक एतेषां नामश्रवणेन यत्स्वरूपं चिन्त्यते तदेव स्वरूपं शास्त्रेऽपि । तद्यथा मेषो मेषाकृतिर्वृषो वृषभाकृतिरित्यादि । अनेन फलकथनार्थं न केवलं लोकसिद्धं स्वरूपं पर्याप्तं भवति, शात्रसिद्धं स्वरूपमेव समर्थं भवति, यत्र शास्त्रकथनं नास्ति तत्र लोकसिद्धस्य परिग्रह इत्युक्तं भवति ।

अत्र **स्वचराश्च सर्व** इत्यनेन सर्वेषां राशीनां सञ्चारदेशाः उक्ताः । अर्थात् स्वस्मिन् स्वस्मिन् स्थान एव राशयः सञ्चरन्ति । अर्थाल्लोकप्रसिद्ध्यनगुणं राशीनां सञ्चारदेशाः निरूप्याः इति ।[१६] मेषादीनां जन्तूनां निवासस्थानानीति लोके यानि प्रथितानि तान्येवात्र निरूपयितव्यानीति । **'राशिभ्यः कालदिग्देशा'** इत्यतो हृतनष्टादौ स्थलनिर्देशेऽस्य महानुपयोगः ।

**स्वल्पं वृत्तविचित्रमर्थबहुलं शास्त्रपल्लवं प्रारम्भ**[१७] इति प्रतिज्ञायताचार्येण केवलम् एतावन्मात्रस्यार्थस्य सिद्धयः एवंरीत्या श्लोको न बद्धः, यद्येतावता विरमामस्तर्हि प्रतिज्ञातस्य लक्ष्यं न सिद्ध्येदिति विचिन्तयद्भिर्व्याख्यानचतुरैर्व्याख्याकारैर्बहुधात्रार्थकल्पनमकारि । स प्रपञ्चोऽधुना व्यक्तीकरिष्यते ।

अत्र भक्षणार्थोऽपि ग्राह्यः । अनेन मेषादीनां भक्षणपदार्थानामपि ज्ञानं भवति । अतो मेषस्य कटुकोष्णादि, वृषभस्य तृणादिकम्, मिथुनस्यान्नादिकम्, कर्कटस्य मत्स्यादिकम्,

सिंहस्य मृगमांसादिकं चेत्यादि भक्षणत्वेन चिन्त्यम् । देवप्रश्ने नैवद्यचिन्तने, भोजनप्रश्नेऽपि भोजनपदार्थचिन्तनेऽस्योपयोगः स्यात् ।

अत्र स्वचराश्च सर्व इत्युक्तम् । चरधातोर्गति–भक्षणरूपार्थद्वयसत्त्वे गत्यर्थेन पूर्वं सञ्चारदेशाः उक्ताः । उक्तेन राशिस्वरूपेण राशीनां स्वभावो वा शीलं चिन्त्यम् । अत उक्तस्वरूपमाश्रित्य तेषां राशीनां स्वभावो लोकप्रसिद्धश्चिन्त्यः । स एव विषयो राशिशीलाध्याये मिहिरेण शब्दशो वक्ष्यते । तदत्र कोष्ठे निबध्यते ।

अत्र **स्वचराश्च सर्व** इत्यनेनैव राशीनां चतुष्पदादित्वम्, पौरग्राम्यत्वादित्वमपि व्यक्तं भवति । चर–धातोः गत्यर्थकत्वात् चरः = चारः = चरणमिति गमन उपयुक्तपादानाश्रित्य

| राशयः | स्वरूपवशात्कल्पिता लोकप्रसिद्धाः स्वभावाः | राशिशीलाध्याये मिहिरोक्ताः स्वभावाः |
|---|---|---|
| मेषः | सञ्चारशीलः, शीघ्राशनः, कुनखी, तोयभीरुः, कामी, शाकभुक् | उष्णशाकलघुभुक्, अटनः, कामी, कुनखी, तोये भीरुः |
| वृषः | मन्दगामी, पृथुवक्त्रः, दीप्तोदराग्निः, क्लेशसहिष्णुः, पुष्टाङ्गः | खेलगतिः, पृथूरुवदनः, क्लेशसहः, ककुदवान् , दीप्ताग्निः |
| मिथुनम् | सङ्गीतकुशलः, मैथुननिपुणः, हास्यज्ञः, इङ्गितज्ञः, नृत्तज्ञः | सुरतोपचारकुशलः, हास्येङ्गितद्यूतवित् , गीतप्रियः, नृत्तवित् |
| कर्कः | वक्रगतिः, जलतत्परः, जलाशयनिर्माणपरः | आवक्रद्रुतगः, तोयोद्यानरतः |
| सिंहः | पृथुवदनः, स्त्रीद्वेषी, मांसादिभक्षणरतः, गुहानिवासशीलः, गिरिचारी, पराक्रमी, गर्वी, क्षुद्बाधितः | स्थूलहनुः, विशालवदनः, प्रियमांसकाननगः, क्षुत्तृष्णोदरदन्तमानसरुजा सम्पीडितः, विक्रान्तः, सुगर्वितमानाः |
| कन्या | सुरतप्रियः, लज्जान्वितः, परगृहवासी, प्रियभाषी, परदेशवासी, कलाज्ञः | व्रीडामन्थरचारुवीक्षणगतिः, कलासु निपुणः, सुरतप्रियः, परगृहैर्वित्तैश्च संयुज्यते, परदेशगः |
| तुला | क्रयविक्रयकुशलः, कृशगात्रः, चलद्गात्रः, अर्थपतिः, वाणिज्यपरः, व्यवहारतत्परः, न्यायवादी | अर्थान्वितः, क्रयविक्रयेषु कुशलः |

| | | |
|---|---|---|
| वृश्चिकः | विषधरः, श्वभ्रचारी, क्रूरः, जनन्या त्यक्तः | क्रूरचेष्टः, छन्नपापः, जनकगुरुवियुक्तः |
| धनुः | राजसन्निधिवासः, कुब्जाङ्ग, समरोत्सुकः, दीर्घमुखः, स्थूलदन्तः | व्यादीर्घास्यशिरोधरः, वीर्यवान् , स्थूलरदश्रवोधरनसः, कुब्जांसः |
| मकरः | अधः कुशः, सुन्दरनेत्रः, अल्पस्फिक्, शीतालु, अटनः, विरुद्धबुद्धिः, सात्त्विकः, धर्मध्वजः, अल्पस्फिक् , शीतालुः, चाञ्चल्यवान् | धर्मध्वजः, अधःकुशः, स्वक्षः, क्षामकटिः, अलसः, शीतालुः, अटनः |
| कुम्भः | भारवाही, अप्रयोजककार्यवान् , चिन्तावान् पुरुषः, जलार्थी, अल्पमुखः, पृथुरूपः | अध्वसहः, क्षयवृद्धियुतः, पृथुचरणोरुपृष्ठजनघनायकटिः |
| मीनः | सुन्दरनेत्रः, जलचरभोक्ता, आकर्षकशरीरः, बृहच्छरीरः | जलचरधनभोक्ता, समरुचिरशरीरः, बृहत्कः, चारुदृष्टिः |

चतुष्पदादित्वं चिन्तयेत् । अनेन मेषवृषौ सिंहश्च चतुष्पद इति, मिथुनं कुम्भस्तुला कन्या च नरराशिरिति, कर्कमीनौ जलचराविति, चापी नरोऽश्वजघन इति स्वरूपेण धनुष उत्तरार्धं चतुष्पात्पूर्वार्धं च नर इति, मकरपूर्वार्धं मृगास्यत्वाच्चतुष्पादुत्तरार्धं च मकरत्वाज्जलचरश्चेत्यवगन्तव्यम् । वृश्चिकस्य कीटत्वमपि लोकसिद्धम् । एवं राशीनां जलचरत्वादिकमपि श्लोकेनानेन सिद्ध्यति ।

एवमेव राशीनां ग्राम्यनागरत्वादिकमपीत एव ज्ञायते । तुलाराशेः वणिक्त्वात्, कन्याराशेः नौस्थत्वात्, धनुर्धरस्य राजसम्बन्धित्वाच्च पौरत्वं सिद्ध्यति । मेषवृषकुम्भमिथुनानि ग्राम्यानि । सिंहमकाराद्यर्धयोरारण्यत्वमपि व्यक्तमेव । कर्कवृश्चिकमीनानामाकारदर्शनात् सरीसृपत्वमूह्यम् । इत्येवं स्वरूपेणैव राशीनां नागरत्वादिकमपि प्रकटितं भवति ।

**एवं राश्याकृतिस्वभावस्थानकथनस्य प्रयोजनन्तु यत्राकृतिस्वभावविशेषापेक्षा जन्तूनां स्थानविशेषपरिज्ञानापेक्षा च विद्यते तत्र तत्रानेन विधिना विनियोग**[१८] इति ।

शुभनिमित्तान्यप्यत्रोक्तानि सन्ति ।[१९] यतः प्रश्नमार्गे –

**मत्स्यौ घटीति पद्योक्तं निमित्तं च शुभप्रदम् ।।**[२०]

अत्र मत्स्या इति जलचरमांसयुगलम्, नृमिथुनमिति नरमिथुनम्, सगदमिति

गदाद्यायुधधारी पुरुषः, सवीणमिति वीणादीनां दर्शनम्, तद्ध्वनिः, चापी नर इति चापधारी वा सशस्त्रः, अश्वजघन इत्यनेन अश्वारूढः,[२१] मकर इति जलचरभेदः, मृगास्य इति मृगाणामपृष्ठभागदर्शनम्, तौलीति वर्धमानो वणिक्, ससस्य दहना इति सस्यादीनि द्रव्याणि, ज्वलदग्न्यभिमुखकन्या वा नौकाभिमुखकन्या च शुभं निमित्तमिति जानीयात् । एवमनेन पद्येनोक्ता विषयाः स्वाभिप्रेतार्थगमकाः सन्ति ।

**स्वनामसदृशा** इत्युक्तत्वाच्छिल्प्यादीनां शस्त्रादिशब्दश्रवणो न दोषाय । एवमेव नदीतटवासिनामप्यार्द्रवस्त्रादिकमदोषाय ।[२२] अर्थाद्ये यदाश्रित्य जीवन्ति, सामान्यतस्तद्दुष्टं शकुनं चेदपि तेषां विषये तन्न दोषाय भवति ।

अथवा **स्वनामसदृशा** नाम प्रश्नकाले श्रुतेन शब्देन या क्रिया निरूप्यतेऽथवा तस्य शब्दस्य कोऽर्थस्तादृशं फलं प्रच्छक आप्नोतीति ।

अथवा **स्वनामसदृशा** नाम पुन्नामश्रवणेन पुंसां शुभम्, स्त्रीनामश्रवणेन स्त्रीणामिति । गर्भप्रश्नेऽस्य महानुपयोगः । विवाहप्रश्नेऽपि तत्काले यस्याः स्त्रिया नामादिकं श्रूयते तत्सदृशी कन्या, पुरुषसदृशो वरः स्वभावरूपादिषु वाच्यः ।

एवमेव **स्वचराश्चसर्व** इत्यनेनैव प्रश्नकाले यदुक्तं, यद्दृष्टं, यच्च श्रुतं तत्सर्वं पृच्छकस्य प्रश्नविषयसम्बन्धिनिमित्तत्वेन स्वीकार्यमिति ।[२३]

अथवा **स्वचराः** स्वपक्षचराः । विवाहप्रश्ने वधूवरयोर्विषये, सन्ततिप्रश्ने शिशोः विषयेऽप्यनेन चिन्तनं कर्तुं शक्यते । अर्थस्तु, प्रश्नकाले दृश्यमाना वस्तुविशेषाः प्रच्छकस्य स्वाभीष्टप्रश्नविषयनिरूपका भवन्तीति । अर्थाच्छकुनानि यानि दृश्यन्ते तानि तत्पक्षे नाम प्रच्छकप्रश्नविषयपक्षे चरन्ति गच्छन्तीति । अर्थात्तानि शकुनानि प्रश्नविषयनिरूपणपक्षे स्वीकार्याणि नाम यानि कानिचनापि शकुनानि प्रश्नकाले दृश्यमानानि प्रश्नपक्ष एव सन्तीति स्वीकार्याणि, तथा दैवज्ञेन यथायोग्यं फलनिरूपणे समायोज्यानीति । सन्ततिप्रश्ने प्रश्नकाले दृश्यमाना स्त्री वा पुरुषः स्त्रीसन्ततिं पुरुषसन्ततिं च क्रमेण दर्शयतः । विवाहप्रश्ने तु पूर्वोक्तवज्ज्ञेयम् ।

इतः परं केवलं राशिस्वरूपमाश्रित्य यत्र यत्र फलनिरूपणं विहितं तत्तत्स्थानं यथाशास्त्रं सङ्ग्रह्य प्रदर्श्यते ।

**१. वियोनिजन्मनि**

**चन्द्रोपगद्विरसभागसमानरूपं सत्त्वं वदेद्यदि भवेत्स वियोनिसंज्ञः ।।**[२४]

वियोनिकथने चन्द्रस्थितद्वादशांशराशिसमानं वियोनिं कथयेत् इति वराहः । पापानां बलित्वे सौम्यानां विबलत्वे लग्नकेन्द्रे क्लीबग्रहे च सति चन्द्रद्वादशांशो वियोनिश्चेत् तद्राशिसदृशवियोनेर्जन्म वाच्यम् । तच्च सारावल्यां विशेषेणोक्तम् – 'मेषे शशी तदंशे छागादिप्रसवमाहुराचार्याः । गोमहिषाणां गोंऽशे नररूपाणां तृतीयेंऽश[२५] इत्यादिना । अतो

मेषद्वादशांशे स्थिते चन्द्रे मेषो वा मेषसदृशचतुष्पादिति, गोंऽशे गवादयश्चेत्यादिकमूह्यम् ।

२. **सुरतप्रश्ने**

**यथास्तराशिर्मिथुनं समेति तथैव वाच्यो मिथुनप्रयोगः ।।**[२६]

गर्भाधाने वा सुरतप्रश्न आधानाद्वा प्रश्नलग्नात्सप्तमो राशिर्येन प्रकारेण संयोगमेति तथैव दम्पत्योर्मैथुनं जातमिति वाच्यम् । नाम सप्तमराशिर्द्विपाच्चेत् तद्वच्चतुष्पाच्चेत्तथेत्यादिकं चिन्त्यम् । तथैव सति मेषे सप्तमे वनिताप्रियत्वम्, वृषे सौभाग्यवत्वं प्रमदाप्रियत्वं च, मिथुने सुरतोपचारकुशलत्वम्, कुलीरे स्त्रीनिर्जितत्वम्, सिंहे स्त्रीद्वेषित्वम्, कन्यायां सुरतप्रियवम्, तुलायां स्त्रीनिर्जितत्वम्, वृश्चिके स्त्रियः सुखहीनत्वम्, चापे पुरुषप्रधानत्वम्, मकरकुम्भयोः सुरतेऽसुखवम्, मीने स्त्रीजितत्वं च वाच्यम् ।

३. **गर्भमोचनविषये**

**यद्यद्राशिर्व्रजति हरिजं गर्भमोक्षस्तु तद्वत् ।।**[२७]

यद्यप्यत्र प्रसवकालस्य लग्नस्य शीर्षोदयादित्वमाश्रित्य तथैव गर्भमोक्षो वाच्य इत्यर्थोऽभिप्रेतो मिहिरस्येति व्याख्यातॄणामभिमतम् । मया तु यो राशिर्लग्नमेति प्रसवे तस्य मेषादिस्वरूपमाश्रित्य तादृशजन्तोर्यथा गर्भमोक्षो भवति तथा गर्भमोक्षो वाच्य इत्यर्थः कल्प्यते । एतस्य सम्भवासम्भवादिकं चिन्त्यम् ।

४. **नष्टजातके**

**भक्ष्याहृताकाररुतैश्च चिन्त्यम् ।।**[२८]

नष्टजातके यदा पृच्छा क्रियते तदा भक्ष्याहृताकाररुतैश्च राशिर्वाच्यः । तत्र राशिज्ञानार्थमनेके प्रकाराः प्रोक्ताः । तत्रानिर्णीते राशा एतेषामुपयोग इति केचन । अथवा यदृच्छया प्रश्नकालोपगतैर्वस्तुभिः राशिसम्बन्धिभिः राशिविनिर्णय इत्यपरे । तत्र राशिभक्ष्यैस्तृणादिभिर्वाहृतै राशिसम्बन्धिभिरूर्णादिभिर्वा तेषां रुतेन वा जन्मराशित्वेन मेषादयो वाच्याः । तथाकारेण नाम तेषां प्रतिरूपेणालेख्यगतेन वा दारुदन्तादिनिर्मितेन यदृच्छया प्रश्नकालदृष्टेन वा स राशिर्जन्मराशिरिति वाच्यः ।

५. **मृत्युचिन्तने**

**ग्राम्यारण्यजलात्मके तु निधने ग्रामे वनेऽम्ब्वन्तिके ।।**[२९]

जातकवशान्मरणचिन्तनेऽष्टमराशिर्ग्राम्यश्चेद्ग्रामे मरणमरण्यराशिश्चेदरण्ये जलराशिश्चेज्जले मरणमिति विचिन्त्य वक्तव्यमिति प्रश्नमार्गकारः ।

६. **बन्धनयोगे**

**मेषादिः खलु लग्नगो भुवि तथा पाशादिभिः प्रच्छकः ।।**[३०]

वेश्याहेतुना वार्णादिना कारणेन बन्धनयोगे सति मेषादिना बन्धनकथनवेलायां मेषादीनां लोके यथा पाशादिभिर्बन्धनं तथैव प्रच्छकोऽपि बद्धो भवतीति वाच्यम् ।

**७. विवाहमेलने**

**हित्वा मृगेन्द्रं नरराशिवश्याः सर्वे तथैषां जलजाश्च भक्ष्याः ।**
**सर्वेऽपि सिंहस्य वशे विनालिं ज्ञेयं नराणां व्यवहारतोऽन्यत् ।।**[३१]

स्त्रीपुंसोर्जातकमेलने वश्यकूटे मुहूर्तचिन्तामणौ राशिस्वरूपमाश्रित्यैव लोकव्यवहारक्रमेण वश्यत्वादिकमुक्तम् ।

**८. अष्टमङ्गलप्रश्ने स्वर्णाराशिफले**

स्वर्णनवांशफलं राशिस्वरूपमाश्रित्य कथितमेवं दृश्यते –

**शत्रोः पीडां रुजं वा निगदतु वृषभे गोमहिष्यादिलाभम् ।।**[३२]
**भूयः सिंहं गतेऽस्मिन् वनमृगजनिता भीतिरेतद्विनाशः ।।**[३३]
**जूके वाणिज्यकृष्यादिभिरिह विभवान् भूमिवादं समीयात् ।।**[३४]
**कीटे कीटभयं महोरगभयं श्वभ्रान्विते मन्दिरे ।।**[३५]
**चापे राजभयं वृथैव कलहं रोगं सुवर्णक्षयम् ।।**[३६]
**नक्रे नक्रभयं तथान्यजलजन्तूपद्रवं वा ।।**[३७]
**मीने मीनविषं जलोद्भवरुजं कृष्यर्थसिद्धिं वदेत् ।।**[३८]

एवं राशिस्वरूपमेवाश्रित्य शास्त्रे बहुधा फलानि पर्यकल्पि महद्भिर्महर्षिभिः । तान्येवात्र मया सङ्कलितानि । अतोऽन्त आर्यपरमपीष्टमिदं स्मर्यते वटेश्वरवचनम् –

**कालक्रियागणितगोलमहागमार्थज्ञानप्रपञ्चविमलीकृतचारुधीभिः ।**
**दिव्यैः प्रदर्शितमिदं मुनिभिर्यदज्ञाः कुमी वयं तदवलोक्य गुणस्स तेषाम् ।।**[३९]

।।नमोस्तु पूर्वप्रणेतृभ्यः।।

।। शम्।।

**सन्दर्भ**

१. भट्टोत्पलः – प्रथमश्लोकव्याख्यायाम् ।
२. दशाध्यायी – प्रथमश्लोकव्याख्यायाम् ।
३. सिद्धान्तशिरोमणिः – गोलाध्याये – गोलप्रशंसा ६ ।
४. शब्दकल्पद्रुमः 'राशिः' इत्यस्मिन् ।
५. श्रीसूर्यसिद्धान्तः – भूगोलाध्यायः २२–२५ ।
६. यद्यप्ययनचलनकारणेन स्थिरत्वं न भवति राशीनाम् ।
७. सिद्धान्तसार्वभौमः ।
८. बृहज्जातकम् – १.४ । राशिशीलोक्तस्य मेषशीलस्य 'सहोत्थाग्रज' (बृहज्जातकम् – १७.१) इति फलेनापि मेषस्य राशिषु प्रथमत्वं व्यज्यते ।
९. श्रीसूर्यसिद्धान्ते – १.२७ ।

१०. 'गोलौ स्तः सौम्ययाम्यौ क्रियधटरसभे खेचरे' – इति केतकीग्रहगणिते स्पष्टाधिकारः – १२ ।

११. शब्दकल्पद्रुमे 'राशिः' इत्यस्मिन् पदे । 'राशीनामुदयो लग्नं ते तु मेषवृषादयः' इति सिंहः (अमरे – १.३.११८) ।

१२. बृहज्जातकम् – १.५ ।

१३. उभयोदयत्वमुभयथा सिद्ध्यति । उभयोर्नाम द्वयोरुदय इत्यथवोभयोः शीर्षोदयपृष्ठोदययोरुदय इति । अतः प्रथममाश्रित्यैव मिथुनमप्युभयोदयमति मन्त्रेश्वरः । तथा च तद्वचनम् –
'गोकर्क्यर्श्वजनक्रभान्यथ नृयुङ्मीनौ परे राशयस्ते पृष्ठोभयकोदयाः' – फलदीपिका – १.०८ ।

१४. बृहज्जातकम् १.१० ।

१५. अपूर्वार्थप्रदर्शिकायां मत्स्यौ घटीति पद्यस्य व्याख्याने ।

१६. शास्त्रोक्तयनुगुणं शास्त्राविरुद्धं लोकप्रसिद्धं स्वीकार्यम् ।

१७. बृहज्जातकम् १.०२ ।

१८. दशाध्याय्यां मत्स्यौ घटीति पद्‌यस्य व्याख्याने ।

१९. अन्यजन्मकृतं पुंसां सर्वं कर्म शुभाशुभम् ।
यत्तस्य शकुनः पाकं निवेदयति पृच्छताम् ।। – प्रश्नमार्गः ३.०६ ।

२०. प्रश्नमार्गः – ३.२१ ।

२१. राशिस्वरूपविषयेऽश्वजघन इत्यनेनाश्वारूढो न चिन्त्य इत्युक्तम् । शकुने त्वश्वारूढ एव चिन्त्यः ।

२२. प्रश्नमार्गव्याख्यायाम् – ३.२१ ।

२३. राशिग्रहाणां सर्वत्र दुर्विज्ञेयं शुभाशुभम् । शकुनैर्जातसंवादं राशिग्रहफलं स्फुटम् ।।' (प्रश्नानुक्रमः – २.१७३) इत्यनेन राशिग्रहफलमेव शकुनैः स्फुटीभवतिति तादृशानामेव शकुनानां ग्रहणं कार्यम् ।

२४. बृहज्जातकम् – ३.१ ।

२५. सारावली – ५३.३१ इत्यादि ।

२६. बृहज्जातकम् – ४.२ ।

२७. बृहज्जातकम् – ५.१७ ।

२८. बृहज्जातकम् – २६.०६ ।

२९. प्रश्नमार्गः – ११.३४ ।

३०. प्रश्नमार्गः – १४.११० ।

३१. मुहूर्तचिन्तामणिः – ६.२३ ।

३२. प्रश्नानुक्रमः – ८.४९ ।

३३. प्रश्नानुक्रमः – ८.५० ।

३४. प्रश्नानुक्रमः – ८.५० ।

३५. प्रश्नानुक्रमः – ८.५१ ।

३६. प्रश्नानुक्रमः – ८.५१ ।

३७. प्रश्नानुक्रमः – ८.५१ ।

३८. प्रश्नानुक्रमः – ८.५२ ।

३९. वटेश्वरसिद्धान्तः – १.२ ।

**आधारग्रन्थसूची –**

१. प्रश्नमार्गः (कन्नड–संस्कृतव्याख्यासहितः)

२. बृहज्जातकम् (भट्टोत्पल–रुद्रविवरण–दशाध्यायी–अपूर्वार्थप्रदर्शिकायुक्तम्)
३. सारावली
४. प्रश्नानुक्रमः
५. फलदीपिका
६. केतकीग्रहगणितम्
७. सिद्धान्तसार्वभौमः
८. वटेश्वरसिद्धान्तः
९. श्रीसूर्यसिद्धान्तः
१०. मुहूर्तचिन्तामणिः
११. अमरकोषः
१२. शब्दकल्पद्रुमः

**पाणिनीया**
**ISSN-2321-7626**
Vol. XXIV, Year VI
विक्रमाब्दः २०७६
ज्येष्ठ-श्रावणमासाङ्कः
मई-जुलाई 2019

# शङ्करनारायणविरचिततन्त्रदर्पणाभिधान-वार्षिकतन्त्रव्याख्याने चन्द्रशृङ्गोन्नतिविचारः

**राधाकृष्णः बी.**

**वेदास्तावत् यज्ञकर्मप्रवृत्ताः यज्ञाः प्रोक्तास्ते तु कालाश्रयेण ।**
**शास्त्रादस्मात् कालबोधो यतः स्यात् वेदाङ्गत्वं ज्योतिषस्योक्तमस्मात् ।।**[१]

सूर्यादीनां ग्रहाणामश्विन्यादिनक्षत्राणां धूमकेत्वादिज्योतिःपदार्थानां स्वरूपं, सञ्चारः, परिभ्रमणकालः, ग्रहणम् , स्थितिः इत्यादयः यस्मिन् शास्त्रे निरूप्यन्ते तच्छास्त्रं ज्योतिषम् इति । प्रथमं ज्योतिषशास्त्रं ब्रह्मणा यज्ञप्रवर्तनाय सृष्टम् । वेदाङ्गेषु ज्योतिषं मूर्धनि स्थितम् । भूत,भविष्यत्, वर्तमाननिर्णायकत्वेन सिद्धान्त,संहिता, होराश्च इति स्कन्थात्रयाःअटा वर्तन्ते । प्रश्नमार्गकर्तुः मतानुसारं शास्त्रमिदं मनुष्यस्य पूर्वजन्मनि अर्जितस्य सकलकर्मणः शुभाशुभरहस्यं दीपवत् प्रकाशयति । यथा,

**यदुपचितमन्यजन्मनिशुभाशुभं तस्य कर्मणः पक्तिम् ।**
**व्यञ्जयति शास्त्रमेतत् तमसिद्रव्याणि दीप इव ।।**[२]

आधुनिकमनोविज्ञान, जीवविज्ञान–पदार्थविज्ञान–रसायनविज्ञान–चिकित्सादयः बहुविषयाः ज्योतिश्शास्त्रान्तर्गतं इति वक्तुं शक्यते ।

**अप्रत्यक्षाणि शास्त्राणि विवादास्तेषु केवलम् ।**
**प्रत्यक्षं ज्योतिषं शास्त्रं चन्द्रार्कौ यत्र साक्षिणौ ।।**

सम्यक् हितं प्रतिपाद्यं यस्यां सा इति संहिता । यस्मिन् समाजस्य हितकरविषयाः सम्यक्तया प्रतिपादिता सा संहिता । अत्र ग्रहाणां स्वभावः, अस्तोदयः, समागमः, नक्षत्रविचाराः, सप्तर्षिविचाराः, वर्णः, द्युतिः, किरणः, रोहिणी, योगः, मयूरचित्रकम्, जलाशयनिर्माणम् इत्यादयः चिन्तिताः । ज्योतिषशास्त्रस्य अङ्गमेकं भवति होरास्कन्धः । अस्मिन् स्कन्धे राशि, होरा, द्रेष्काण,द्वादशांश, नवांश, त्रिंशांश, बलाबलचिन्तनम्, विवाहादयः, मुहूर्तचिन्तनम् इत्यादयः चिन्तनं क्रियते । स्कन्धत्रयेष्वन्तर्गतगणितस्कन्धे मध्यगतिः,

पञ्चाङ्गगणितम्, त्रिप्रश्नः, कालभेदः, ग्रहणः, श्रृङ्गोन्नतिः इत्यादयः वर्णिताः विषयाः । तन्त्र शब्देन अस्य व्यवहारः वर्तते ।

**त्रुट्यादिप्रलयान्तकालकलनामानप्रभेदः क्रमात्**
**चारश्चद्युसदां द्विधा च गणितं प्रश्नास्तथा सोत्तराः ।**
**भूधिष्ण्यग्रहसंस्थितेश्च कथनं यन्त्रादि यत्रोच्यते**
**सिद्धान्तः स उदाहृतोऽत्र गणितसान्धप्रबन्धे बुधैः ।।**[३]

त्रुट्यादितःप्रलयान्तकालपर्यन्तं यत्परिमाणं वर्तते तत्सर्वमत्र सिद्धान्तस्कन्धे दृश्यते।

**ब्राह्मंदिव्यं तथा पित्र्यं प्राजापत्यं च गौरवम् ।**
**सौरंच सावनं चान्द्रमार्क्षं मानानि वै नव ।।**

इति ब्राह्ममानं, देवमानं, पितॄणां मानं, प्रजापतिमानं, गुरुमानं, सौरमानं, सावनमानं, चान्द्रमानं, नाक्षत्रमानमिति नवविधकालमानानि निरूपयन्ति । सिद्धान्ते यत्सर्वं स्फुटीकरणं कुर्वन्ति तत्सर्वं खेटैः स्फुटैरेव फलस्फुटत्वम् इत्युक्तप्रकारेण फलस्फुटीकरणार्थं प्रवृत्तमिदं स्कन्धम् । जगतः सृष्ट्यादिकालादत्र गणितप्रक्रिया दृश्यते । सृष्ट्यादिः इत्युक्ते –

**इत्थं युगसहस्रेणभूतसंहारकारकः ।**
**कल्पो ब्राह्ममहः प्रोक्तं शर्वरी तस्य तावती ।।**[४]

ब्रह्मणः दिनस्यारम्भः यदा भविष्यति तदा विधाता जगतः चराचराणां सर्जनस्यारम्भं करोति । स एव सृष्टिकालः । तस्मादारभ्य गणितप्रक्रियायाः प्रारम्भः यस्मिन् ग्रन्थे दृश्यते स एव ग्रन्थः सिद्धान्तग्रन्थः । यथा सूर्यसिद्धान्तः ।

**करणग्रन्थाश्च**

इष्टशककालादारभ्य गणितप्रक्रिया यस्मिन् ग्रन्थे दृश्यते स ग्रन्थः करणग्रन्थः । राजावल्लभस्य करणकमलमार्तण्ड ग्रन्थः इष्टशक ९८० काले आरम्भः जातः ।

**तन्त्रग्रन्थपरिचयः**

कलियुगारम्भस्य कालादारभ्य सिद्धान्तगणितप्रक्रिया दृश्यते चेत् तन्त्रग्रन्थः भवति । अत्र इष्टशकवर्षः इत्युक्ते कलियुगस्य आरम्भः एव इष्टशकवर्षः । तन्त्रग्रन्थद्वारा खेटानां स्फुटान् भवन्ति चेत् गणितप्रक्रियायां सारल्यमनुभूयते । किमर्थमित्युक्ते सृष्ट्यादितः क्रियते चेत् तत्र दैर्घ्यविस्तृतिः भवति ।

**वार्षिकतन्त्रग्रन्थः**

सिद्धान्तविभागे तन्त्रग्रन्थेष्वन्यतममिदं वार्षिकतन्त्रम् । १३५० शकवर्षात्प्रागेव विद्दणाचार्यः वार्षिकतन्त्रग्रन्थं लिलेख । सः वार्षिकतन्त्रग्रन्थस्यारम्भे **एव –**

**कृतस्यविद्दणाचार्यैः वार्षिकस्य मया स्फुटम् ।**

**बालानां बुद्धिवृद्ध्यर्थं व्याख्यानं क्रियतेऽधुना ।।**
**तस्याभिजातः पृथुकीर्तिरग्र्यः प्रभूतविद्यः प्रचुरव्रताढ्यः ।**
**ज्योतिर्विदां भानुरिवाग्रगण्यो विभासमानो भुवि मल्लयोऽभूत् ।।**[५]

तत्र तावत् सकलबुधशिरौमणिः दिनमणिप्रमुखानेकसिद्धान्तसारवेत्ता विद्दणाचार्यः सूर्यादिग्रहगति जिज्ञासूनां सुखेन तदवगमनाय वार्षिकं नाम तन्त्रं चिकीर्षुः । एवं सः आत्मजनकं प्रशंसयति श्लोके प्रभूतविद्यः प्रचुरव्रताढ्यः मल्लयनामकः विपश्चिदग्रगण्यः भुविमभूत् । स तु कौण्डिन्यमुनेः अभिजातः मल्लयः । तस्य पुत्रः विद्दणः । तदेव –

**तस्याभवद्विद्दण नामधेयः सूनुः सुधारोचिरिव द्वितीयः ।**
**सुवृत्तदानुद्धत पित्र्यलोकस्तन्निर्मितं वार्षिकतन्त्रमेतत् ।।**[६]

मल्लयनामा यः आसीत्तस्य सकलपितृलोकस्योद्धारकः विद्दणनामधेयः सूनुरभवत् । एतद्वार्षिकतन्त्रं तन्निर्मितम् । वार्षिकतन्त्रे ११ अध्यायाः सन्ति ते एव ध्रुवमध्यः, ग्रहगतिनिर्णयः, छायाधिकारः, सूर्यग्रहणम्, चन्द्रग्रहणम्, परिलेखनम् , महापातः, उदयास्तमानाधिकारः, ग्रहयुतिः, भग्रहयुतिः, शृङ्गोन्नतिः । सोलापुरप्रदेशे वार्षिकतन्त्रग्रन्थः उपलब्धः । अस्मिन् ग्रन्थे ग्रन्थकारस्य देशकालविषये किमपि नोक्तवान् । तस्य ग्रन्थस्य प्रथमटीकायां उदाहरणे १६३४ इति शकाब्दं टीकाकारः स्वीकृतवान् । तट्टीकाद्वारा टीकास्थानं बंकापुरमित्यवगन्तुं शक्यते । बंकापुरस्य पलभा ०३।१८ एवं देशान्तरसंस्कारसमये कार्त्तिकपर्वतस्य पश्चिमभागे १३ योजनपरिमाणे दूरमिति वर्तते । इदानीं तत्तु धारवाडनगरे वर्तते। अतः कर्नाटकराज्ये १६०० शकाब्दे प्रचलितग्रन्थेष्वन्यतमः वर्तते ।

**तन्त्रदर्पणः – ग्रन्थकर्ता च**

'श्रीमच्छृङ्गपुरी निवास देमणज्योतिर्विदात्मजेन शङ्करनारायणेन विरचित तन्त्रदर्पणाभिधानवार्षिकतन्त्र व्याख्यान (शा.श.१५२३)' इति वाक्यं ग्रन्थस्यास्य आरम्भे वर्तते। अतः वार्षिकतन्त्रग्रन्थस्य व्याख्याता शृङ्गपुरीत्युक्ते शृङ्गेरी (कर्नाटकराज्ये) नगरस्थः देमणः नाम कश्चन ज्योतिर्विद् तस्य सूनुः शङ्करनारायणः व्याख्यानं करोति तन्त्रदर्पणः इति नाम्ना । 'स्वस्ति श्री जयाभ्युदय शालिवाहन शकाब्देषु त्रयोविंशत्युत्तरपञ्चशतोत्तरैक–सहस्रसंख्येषु (१५२३) गतेषु वर्तमान प्लव संवत्सरे आश्वयुक् शुक्लपूर्णिमायां परिसमाप्तीकृतमिदं व्याख्यानं शङ्करनारायणेन ।।' इति ग्रन्थस्यान्ते दृश्यते । तन्निदानात् १५२३ शकाब्दे प्लवसंवत्सरे आश्वयुजपौर्णमीसमये व्याख्यानं तेन कृतमिति वदति ।

अत्रतन्त्रदर्पणे अष्टाध्यायाः वर्तन्ते । अष्टस्वध्यायेषु क्रमेण १) ग्रहमध्याधिकारः २) ग्रहस्फुटाधिकारः ३) छायाधिकारः ४) चन्द्रसूर्याभ्यां ग्रहणविचारः ५) परिलेखनाध्यायः ६) महापातवैधृतिः ७) उदयास्तमय, युद्धसमागमः, भग्रहमेलनम् ८) शृङ्गोन्नतिःन्यरूपि ग्रन्थकारः ।

**यस्या सहस्त्रकिरणो दिशि तत्र नूनं**
**आलोक्यते शशधरस्य सितोन्नतत्वम् ।**
**पक्षान्तयोरपि सिताऽसितता यतोऽस्य**
**शृङ्गोन्नतिर्लघु ततो गणितावगम्या ।।**[६]
**वक्ष्यमाणप्रकारेण सिद्धा शृङ्गोन्नतिर्भवेत् ।**
**अवलोकयितुं योग्या संस्थिते क्षितिजे रवौ ।।**[७]

इति कार्तान्तिकाः श्रीपतिः,

वेङ्कटेशकेतकर्एवमन्ये कदा शृङ्गोन्नतिः भवति, तस्य परिलेखनक्रमः स्वग्रन्थे विशदेन कथितास्सन्ति । शीतकिरणः शशधरस्य बिम्बे रविकरसंयोगवशात् पक्षादौ मासान्ते च शुक्लभागाकृतिर्युगलशृङ्गवती भवति । चन्द्रशृङ्गोन्नतेः उपयोगः संहितादिषु निरूप्यन्ते । संहितादिफलकथने शृङ्गोन्नतिद्वारा राज्ञ एवं राष्ट्रस्य हिताहितत्वं प्रतिपादयन्ति सांहितिकाः । विद्दणाचार्यस्य तन्त्रग्रन्थे चन्द्रश्रृङ्गोन्नतिपरिज्ञानं तु –

**साम्येदिशोरन्तरमिन्दुभान्वोः क्रान्त्योर्युतिर्भिन्न दिगाश्रयन्त्योः ।**
**तज्येन्दुकाष्ठा यदि शुध्यवृत्तिः क्रान्तिः शशांकस्य तदान्य दिक्का।।**[८]

शुक्लद्वितीयायां सूर्यास्तकालिकौ सूर्येन्दुस्फुटतरावानीय चन्द्रस्य दृक्कर्म कृत्वा अर्केन्द्वोरुक्तवत्क्रान्ती आनीय चन्द्रक्रान्तिं स्वविक्षेपेण संस्कृत्य तत्र द्वयोः क्रान्त्योर्दिक्साम्ये विश्लेषं दिग्भेदे योगं कुर्यात् । तत्र युक्तानां क्रान्तिभागानां चन्द्रक्रान्तेः दिगेव क्रान्तिदिग्भवति । यदा चन्द्रक्रान्त्यां रविक्रान्तिः शोधिता तदापि चन्द्रक्रान्तेर्दिगेव विद्यते । यदा पुनरर्कक्रान्त्यां चन्द्रक्रान्तिः शोधिता तदा अवशिष्टानामंशानां चन्द्रक्रान्तेर्विपरीत दिग्विज्ञेया । तेषामंशानां भुजज्या कोटिज्या च कार्या ।

**भुजकोटिकर्णसाधनम् –**

**सुसंगुणाक्षश्रवसा विभक्ता कोटिज्यया चन्द्रनतांशकाः स्युः ।**
**ते दक्षिणाक्षप्रभया समेता विश्लेषिताः सौम्य दिशा भुजः स्यात् ।।**[११]

साधितभुजज्या विषुवत्कर्णेन संगुण्य तत्कोटिजीवया विभाजिताश्चेत्तदा लब्धमवशिष्टांशदिग्गताश्चन्द्रनतांशकाः स्युः । ते नतांशाः यदि दक्षिणाश्चेत् तदा विषुवच्छायया योज्याः । उत्तराश्चेत्तदा हीयमानाः कार्याः । तदा भुजाङ्गुलानि सिध्यन्ति । कर्णकोटी तु–

**शङ्कुस्तु कोटिर्भुजकोटिवर्गयोगात्पदं स्याच्छ्रुतिरङ्गुलद्या ।**
**समानयेत्पूर्ववदिन्दुबिम्बं संसाधयेत्तस्य सितांगुलानि ।।**[१२]

शङ्कुरेव कोटिः । स तु द्वादशाङ्गुलपरिमितः । स एव द्वादशाङ्गुलसंख्यायाः वर्गं संसाध्य पूर्वमानीत भुजाङ्गुलवर्गं चैकीकृत्य मूले कृते सति कर्णाङ्गुलप्रमाणानि भवन्ति ।

**अर्केन्द्वोः क्रान्तिविश्लेषो दिक्साम्ये युतिरन्यथा ।**
**तज्ज्येन्दुरर्काद्यत्रासौ विज्ञेया दक्षिणोत्तरा ।।**
**मध्याह्नेन्दुप्रभाकर्णसंङ्गुणा यदि सोत्तरा ।**
**तदाऽर्कघ्नाक्षजीवायां शोध्या योज्या च दक्षिणा ।।**
**शेषं लम्बज्यया भक्तं लब्धो बाहुः स्वदिङ्मुखः ।**
**कोटिः शङ्कुस्तयोर्वर्गच्युतेर्मूलं श्रुतिर्भवेत् ।।**[१३]

इत्यार्षे सूर्यसिद्धान्ते भुजसाधनक्रमं निरूपिताः सन्ति । एवं सूर्यसिद्धान्तग्रन्थमनुसृत्य तन्त्रकाराः विद्यन्ते ।

**तन्त्रग्रन्थोक्तरीत्या शुक्लाङ्गुलपरिमाणं निरूपयति विद्दणः –**

**सम्प्रोझ्य तात्काल शशांकतोऽर्कं केन्द्रे षडूर्ध्वे तु विशोध्य चक्रात् ।**
**हत्वावशेषेण शशांकबिम्बं षड्भिन्हरेत्तानि सितांगुलानि ।।**[१४]

तत्कालचन्द्रात् अर्कं विशोध्य शेषं ग्राह्यम् । यदि शेषं षड्राश्यधिके सति चक्राद्विशोधनीयम् । किमर्थमित्युक्ते कृष्णपक्षविषयं भवति । अवशेषेण राश्यादिना चन्द्रबिम्बं संगुण्य षड्भिर्हरेत् । तदा शुक्लाङ्गुलानि सिध्यन्ति । विद्दणः वार्षिकतन्त्रे तु शुक्लाङ्गुलपरिमाणं एतादृशरीत्या साधयति । परन्तु तन्त्रदर्पणव्याख्याने शङ्करनारायणः इतोऽपि शुक्लाङ्गुलपरिमाणसाधनर्थं सूत्रं कथयति । तत्र यल्लब्धं शेषं चन्द्रविम्बाङ्गुलव्यङ्गुलैः संगुण्य अशीत्यधिकशतेन विभजेत्तदा सिताङ्गुलानि लभ्यन्ते । अशीत्यधिकशतमित्युक्ते तत्र षड्राशीनां भागाः । तथा शेषं लिप्तीकृत्य बिम्बाङ्गुलैः संगुण्य खखाष्टदिग्भिः १०८०० विभजेत् तदा यल्लब्धं तत् शुक्लांगुलानि भवन्ति । एवं शुक्लाङ्गुलपरिमाणसाधनक्रमं निरूपयति विद्दणः । सौरे तु सूर्येणोनः शीतगोः कलाः नवशतैः भक्ताः मध्यमशुक्लः भवति । तच्छुक्लं तात्कालिकस्फुट–चन्द्रबिम्बमानेन अङ्गुलात्मकेन गुणितं द्वादशभिः भक्तं तदा स्फुटमङ्गुलाद्यं शुक्लं भवति।[१५]

**वार्षिकतन्त्रग्रन्थस्य तन्त्रदर्पणाभिधान शङ्करनारायणरचित व्याख्यानरीत्या श्रृङ्गोन्नतिपरिलेखनम् ।**

**विधायबिन्दुं फलकेऽर्क संज्ञं बाहुं ततः स्वां ककुभं प्रसार्य ।**
**तदग्रतः कोटिमितां शलाकां पश्चान्नयेत्तच्छिरसीन्दुबिम्बम् ।।**[१६]
**विलिख्य तन्मध्य दिनेश बिन्द्वोर्मध्ये निदध्याच्छृति साम्यरेखाम् ।**
**सा यत्र संस्पृक् शशिबिम्बरेखां ततो विधेयानि सितांगुलानि ।।**[१७]
**दिक्साधनं कर्णवशेन कृत्वा बिम्बस्य याम्योत्तरतश्च बिन्दून् ।**
**शुक्लान्त्य याम्योत्तर बिन्दु सम्स्पृक्कुर्याद्धनुस्तच्छशिखण्डभावः ।।**[१९]

परिलेखनस्थलमेव फलकमिति निर्दिश्यते अत्र । यत्र कुत्रापि फलकादौ दिक्साधितसमप्रदेशे अर्कसंज्ञितमेकं बिन्दुं निधाय तद्बिन्दुसकाशात् भुजाङ्गुलानि स्वदिशं प्रसारयेत् । ततो भुजाग्रे कोटिमितां द्वादशाङ्गुलप्रमितां शलाकां प्रत्यङ्मुखमानयेत् । तदग्रमेव मध्यं कृत्वा चन्द्रबिम्बाङ्गुलार्धप्रमाणसूत्रेण मण्डलं विलिख्य तन्मध्यादर्कबिन्दुपर्यन्तं कर्णाङ्गुलप्रमाणरेखां कुर्यात् । सा कर्णरेखा चन्द्रमण्डलरेखां यत्र स्पृशति तत्प्रदेशात् मण्डलान्तर्मुखं कर्णरेखामार्गेण सिताङ्गुलानि प्रसार्याणि । ततः कर्णरेखामेव पूर्वापररेखा इति प्रकल्प्य तद्वशाद्दक्षिणोत्तररेखां च चन्द्रबिम्बे सिताग्रदक्षिणोत्तरबिन्दुः कुर्यात् । तत्कथमित्युक्ते शुक्लाग्रयाम्ययोः शुक्लाग्रसौम्ययोः मध्ये मत्स्यौ प्रसाध्य द्वयोर्मुखपुच्छविनिर्गतसूत्रसंयोगदेशात् सिताग्रयाम्योत्तरबिन्दुस्पृशा सूत्रेण वृत्तं कुर्यात् । तेन वृत्तेन चन्द्रमण्डलं यावदाक्रान्तं तावत्प्रदेशस्तमोरूपं स्यात् । यावदवशिष्टं तावत्प्रकाशः प्रदृश्यते । तस्मिन् दिने तत्काले आकाशे अपि दक्षिणश्रृङ्गोन्नतो वा उत्तरश्रृङ्गोन्नतो वा चन्द्रस्तथा दृश्यते । तत्र उत्तरभुजेदक्षिणश्रृङ्गोन्नतिः दक्षिणभुजे उत्तरोन्नतिः स्यात् । अत्र शृङ्गोन्नतिः यथा सौरे विद्यते तथैव दृश्यते । करणे केतकीग्रहगणिते परिलेखनविधिः नोक्ताः केतकर्महाभागाः सूर्यसिद्धान्तमेव अनुसृतवन्तः। गणितरीत्यार् सूर्यसिद्धान्ते किञ्चिद्विस्तारेण नतांश–भुजादि साधनं कृतवन्तः। काले काले सारल्येन गणितप्रक्रियां सिद्धान्तकाराः कृत्वा अन्ते तान्त्रिकमार्गे लाघवेन गणितादिकं दृश्यते।

सिद्धान्तग्रन्थाः सृष्ट्यादि गणितप्रक्रियद्वारा वरीवर्ति । सृष्ट्यादि प्रक्रिया यदा क्रियते तदा समयस्यापेक्षा वर्तते । तदर्थं तन्त्र–करणग्रन्थानां परिचयः प्राक्तनाः कृतवन्तः । एतद्वारा कलियुगाद्वा इष्टशकाद्वा गणितप्रक्रिया कर्तुं शक्यते । अतः तन्त्रदर्पणव्याख्यानद्वारा अल्पे काले गणितादिकं कर्तुं शक्यते। इह ज्यौतिषशास्त्रस्येतिहासे शङ्करनारायणनामकग्रन्थकारस्य परिचयः नूतनतया इदमिदानीमेव भविता । सैद्धान्तिकानां कृते गणितप्रक्रिया लभ्यते चेत् साहाय्यं भवति । इदानीन्तन पद्धतिः अस्ति तया साकं प्राक्तना या पद्धतिः आसीत् तदपि अवगच्छामः चेत् अस्माकं भारतीयशास्त्रज्ञानां मतेः विषये एवं अग्रे तद्वारा गणितप्रक्रियायां संस्कारादिकं कर्तुं शक्यते इत्युक्त्वा लेखनव्यापाराद्विरमामि ।

।। कृष्णं वन्दे जगद्गुरुम् ।।

**सन्दर्भ**

१. सि.शि ०१/०१/०९
२. प्र.मा.०१/२६
३. सि.शि ०१/०१/०६
४. सूर्यसिद्धान्तः मध्यमाधिकारः
५. वार्षिकतन्त्रम् ०१?०३
६. वार्षिकतन्त्रम् ०१?०४

७. सिद्धान्तशेखरः चन्द्रशृङ्गोन्नतिः
८. केतकीग्रहगणितम् –चन्द्रशृङ्गोन्नतिः ०१
९. तन्त्रदर्पणः–वार्षिकतन्त्रव्याख्यानम्–शृङ्गोन्नतिः ०१
१०. तन्त्रदर्पणः–वार्षिकतन्त्रव्याख्यानम्–शृङ्गोन्नतिः ०२
११. तन्त्रदर्पणः–वार्षिकतन्त्रव्याख्यानम्–शृङ्गोन्नतिः०३
१२. सूर्यसिद्धान्तः शृङ्गोन्नतिः ०६–०८
१३. तन्त्रदर्पणः–वार्षिकतन्त्रव्याख्यानम्–शृङ्गोन्नतिः०४
१४. सूर्योनशीतगोर्लिप्ताः शुक्लं नवशतोद्धृताः ।
चन्द्रबिम्बाङ्गुलाभ्यस्तं हृतं द्वादशभिः स्फुटम् ? सूर्यसिद्धान्तः–चन्द्रशृङ्गोन्नतिः–०९
१५. तन्त्रदर्पणः–वार्षिकतन्त्रव्याख्यानम्–शृङ्गोन्नतिः ०५
१६. तन्त्रदर्पणः–वार्षिकतन्त्रव्याख्यानम्–शृङ्गोन्नतिः०६
१७. तन्त्रदर्पणः–वार्षिकतन्त्रव्याख्यानम्–शृङ्गोन्नतिः०७

## आधारग्रन्थावलिः


१. भारतीयज्योतिश्शास्त्रस्येतिहासः,लोकमणिदाहालः, चौखम्भा सुरभारती प्रकाशनम् , वाराणसी
२. वेदाङ्गज्यौतिषम्, शिवराजाचार्यः, चौखम्भा सुरभारती प्रकाशनम् , वाराणसी
३. वैदिकवाङ्मयप्रवेशिका, सोमनाथ दाशः,तिरुपति संस्कृतविद्यापीठः
४. षडङ्गज्यौतिषम्, प्रसाद भट्टः, राजीवगान्धी परिसर, शृङ्गेरी– २०१७
५. सूर्यसिद्धान्तः, कपिलेश्वरशास्त्री, चौखम्भा सुरभारती प्रकाशनम् , वाराणसी
६. केतकीग्रहगणितम् ,वेङ्कटेशकेतकर्, भारतीयविद्याप्रकाशन वारणासी
७. शङ्करनारायणविरचित–तन्त्रदर्पणाभिधान वार्षिकतन्त्रव्याख्या( मातृका)
८. सिद्धान्तशिरोमणिः, भास्कराचार्यः, चौखम्भा सुरभारती प्रकाशनम् , वाराणसी

**पाणिनीया**
**ISSN-2321-7626**
Vol. XXIV, Year VI
विक्रमाब्दः २०७६
ज्येष्ठ-श्रावणमासाङ्कः
मई-जुलाई 2019

# पुराणधर्मशास्त्रयोः मानवजीवने उपयोगिता

डॉ. मनोजकुमारद्विवेदी

**'वेदोऽखिलो धर्ममूलम्'** (मनुस्मृतिः) इति समुद्घोषयता मनुना समग्रस्यापि वेदनिधेः धर्माधाररूपेण प्रतिष्ठा विहिता । मानवस्याखिलं कृत्यजातं, कर्तव्याकर्तव्यकं, शुभाशुभनिदर्शकं, संस्कृतेराधाररूपं, सुखशान्तिसाधकं जीवनस्योन्नायकञ्च वेदेषु विशदतया निरूप्यन्ते । अत एव वेदा आचार-संहिता-रूपेण प्रमाणीक्रियन्ते ।

**यः कश्चित् कस्यचिद् धर्मी मनुना परिकीर्तितः ।**
**स सर्वोऽभिहितो वेदे सर्वज्ञानमयो हि सः ।।**

सर्वेऽपि विद्वत्तल्लजाः भारतीयदार्शनिकाः, शब्दतत्वज्ञाः, वैयाकरणाः, अन्ये च शास्त्रकाराः वेदानां परमप्रामाण्यं समुद्घोषयन्ति ।

अत एव महर्षिणा पतञ्जलिना कण्ठस्वरेण व्याकरणमहाभाष्ये उपदिश्यते यत्– **'ब्राह्मणेन निष्कारणो धर्मः षडङ्गो वेदोऽध्येयो ज्ञेयश्च'** इति सर्वं स्वीकृत्य वेदानां महिमा सर्वेषु पुराणेतिहासधर्मादिशास्त्रेषु सर्वैः महर्षिभिः उद्भाविता । परञ्च तेषां शब्दावलिः, प्रतिपादनशैली, प्रक्रिया च कठिना वर्तते । तस्मात् वेदानाम् अध्ययनम् अवगमनञ्चापि वयं कर्तुं न शक्नुमः । अवबोधनाभावात् संस्कृतेः ज्ञानं भवितुं नार्हति। संस्कृतिं विना जीवनस्य उन्नायकान् संस्कारान् वयं प्राप्तुं न समर्थाः इति निश्चप्रचम् । तेषां संस्काराणाम् उल्लेखः सर्वजनहिताय सर्वजनसुखाय च सरलतमायां भाषायां महाकविना व्यासेन अष्टादशपुराणेषु कृतः । किन्नाम पुराणमितिजिज्ञासायां वहव्यः व्युत्पत्तयः समापतन्ति । यथा – **'पुराण'** शब्दः नपुंसकलिङ्गवाचकः । पुरा अव्ययात्

'पुराभवम्' इत्यस्मिन्नर्थे **'सायंचिरंप्राह्णेप्रगेऽव्ययेभ्यष्ट्युट्युलौ तुट् च'** (पाणिनिसूत्रम् ४/३/२३)[१] इत्यनेन सूत्रेण पुरा शब्दात् ट्यु प्रत्यये तुटागमे पुरातनम् इति शब्दस्य सिद्धिर्जायते । परञ्च पाणिनिः **'पूर्वकालैकसर्वजरत्पुराणनवकेवलाः समानाधिकरणेन'** (पाणिनिसूत्रम् २/१/४९)[२] 'पुराणप्रोक्तेषु ब्रह्मणकल्पेषु' (पाणिनिसूत्रम् ४/३/१०५)[३] इत्यनयोः सूत्रयोः पुराणशब्दस्य प्रयोगञ्चकार । तस्मात् तुडभावः स्वयमेव पाणिनिना प्रतिपादितः । यद्वा पुरा अव्ययपूर्वकात् नी धातोः 'ड' प्रत्यये णत्वे च कृते पुराणशब्दस्य निर्वचनं भवति । निरुक्तकारेण यास्कमुनिना पुराणशब्दस्य व्युत्पत्तिः '**पुरानवम्** पुराणमिति अकारि ।

**वायुपुराणे -** **यस्मात् पुरा ह्यनक्तीदं पुराणं तेन तत् स्मृतम् ।**
**निरुक्तमस्य यो वेद सर्वपापैः प्रमुच्यते ।।**

**पद्मपुराणे -** **पुरा परम्परां वष्टि पुराणं तेन तत् स्मृतम्**

**ब्रह्माण्डपुराणे - पुरा एतत् अभूत् ।**

एताभ्यः व्युत्पत्तिभ्यः अस्माभिः मीमांस्यते यत् पुराणानां वर्ण्यविषयः प्राचीनकालात् सम्बद्धः वर्तते । सा प्राचीनता तु वेदेषु निहिता । परञ्च सरलतमं ज्ञानं व्यावहारिकं पक्षञ्च पुराणेभ्यः एव स्वीकुर्मः । तस्मात् आधुनिके जीवने पुराणानां महती आवश्यकता विद्यते ।

अस्माकं पुण्यमयं भारतवर्षं प्राचीनकालात् प्रकृत्याः रमणीयं रङ्गस्थलमासीत् । प्रकृत्या देव्या स्वकरकमलाभ्यां अस्य राष्ट्रस्य शोभा अलङ्क्रियते । उत्तरस्यां दिशि हिमाच्छादितः हिमालयः विश्वाय आध्यात्मिकोन्नतेः परिचयं प्रददाति । दक्षिणस्यां नीलाम्बुधिःचरणयुगलं प्रक्षालयन् अस्य राष्ट्रस्य शोभां विस्तारयति । पश्चिमे अरबसागरः, पूर्वस्यां बङ्गालप्रदेशस्य श्यामाखाडी च कीदृशं सौन्दर्यं वर्धेते । यथोक्तम् -

**उत्तरं यत् समुद्रस्य हिमवद्दक्षिणं च यत् ।**
**वर्षं तद् भारतं नाम यत्रेयं भारती प्रजा ।।**

भारतदेशस्य यादृशं बाह्यस्वरूपं भव्यं सुमनोहरञ्च वर्तते, तादृशम् आन्तरिकम् आध्यात्मिकस्वरूपमपि अभिरामम् आभामयं दरीदृश्यते। जगतीतले सभ्यतायाः सामाजिकतायाः मानवतायाः जननी भरतमही एव । तस्याः सभ्यतायाः शब्दमयस्वरूपम् अनेकाभिः ऋषिभिः नानाविधपुराणेषु प्रोक्तम् । अत एव मनुना उच्यते -

**एतद्देशप्रसूतस्य सकाशादग्रजन्मनः ।**
**स्वं स्वं चरित्रं शिक्षेरन् पृथिव्यां सर्वमानवाः ।।**

इत्यनेन प्रमाणेन नितान्तं सत्यम् अभवत् यत् अस्यां भारतभूमौ स्वर्गं विहाय देवाः आगमनाय समुत्सुकाः वर्तन्ते । अस्य वास्तविकं स्वरूपं श्रीमद्भागवतमहापुराणे वेदव्यासेन प्रतिपादितम् -

**अहो अमीषां किमकारि शोभनं, प्रसन्न एषां स्विदुत स्वयं हरि :।**
**यैर्जन्म लब्धं नृषु भारताजिरे, मुकुन्दसेवौपयिकं स्पृहा हि नः ।।**

संस्कृतिर्हि जीवनस्यान्तरङ्गं स्वरूपं प्रकाशयति । परस्परं विद्वेषभावनया या कापि जातिः स्वस्य राष्ट्रस्य संस्कृतेश्च गौरवं विस्मृत्य परेषां संस्कृतिं स्वीकरोति तदैव सा जातिः अन्यैः उपेक्षिता भवति । अन्ये आक्षिपन्ति यत् अस्याः जातेः धार्मिकग्रन्थाः कपोलकल्पिताः, पूर्वजाः असभ्याः, भाषा अव्यवहारिकी, वस्त्राभरणानि लज्जापूर्णानि, आचार-विचाराः नैव सुसङ्गताः इति उक्त्वा अन्यधर्मावलम्बिनः अयोग्यतां प्रतिपादयन्ति । जगदिदं साक्षि वर्तते सनातनधर्मावलम्बिनामेव प्राक्तनात् कालात् आर्यत्वेन प्रतिष्ठा समुदाह्रियते । स्वधर्माचरणम्, परोपकारः, स्वार्थपरित्यागः, ईश्वरानुरागः, वसुधैवकुटुम्बकम् एतेषां पुनीतभावाः विलोक्यन्ते । अधुना दृश्यते यत् प्रायशः भारतीयाः पौराणिकीं पुण्यतमां सुसंस्कृतिं शिक्षापद्धतिं विस्मृत्य लार्डमैकालेमहोदयस्य विषाक्तरूपां शिक्षापद्धतिम् अनुपाल्य मनसि च निधाय स्वातीतगौम्, अवतारवास्, वर्णाश्रमव्यवस्थाधर्मम्, मूर्तिपूजाम्, वेदमतम्, पौराणिकमतञ्च उपेक्ष्य खण्डनञ्च कृत्वा उपहासं कुर्वन्ति कथयन्ति च अहो ! कीदृशी अप्राकृतिकी प्रक्रिया वर्तते, एतेषु पुराणेषु धर्मग्रन्थेषु च । किमिदं सुयोग्यं चिन्तनम् ? एतत् चिन्तनम् तु भारतीयानां कृते शोभनं नास्ति । अत्र धार्मिकशिक्षायाः अभावः दृश्यते, सा धार्मिकशिक्षा तु पुराणेषु निहिता अतः पुराणधर्मशास्त्रयोः वर्तमानकाले नितरामावश्यकता वर्तते ।

प्रत्येकस्य राष्ट्रस्य सभ्यता, संस्कृतिश्च तस्य राष्ट्रस्य साहित्ये वर्णिता भवति । यस्य राष्ट्रस्य सभ्यता, संस्कृतिश्च यावती उन्नता भवति तस्य देशस्य साहित्यमपि तावदेव समुन्नतम् भवति । अस्माकं भारतदेशस्य भाषा-धर्म-दर्शन-आचार-विचार-नीति-शिल्प-कला-ज्ञान-विज्ञानादीनां संस्कृतेश्च यादृशं बीजभूतं स्थानं वेदेषु, उपबृंहणरूपं स्थानम् संस्कृतसाहित्ये, धर्मग्रन्थेषु, पुराणेषु च प्राप्यते तादृशं स्थानम्

अन्येषां देशानां संस्कृतेः स्थानं नास्तीति मदीयः अनुभवः । अतएव वेदव्यासेन प्रोक्तम् – **'इतिहासपुराणाभ्यां वेदं समुपबृंहयेत्'**

किमधिकं कथयामि पुराणं तु भारतीयानां परमं धनं वर्तते । उपासनायाः मार्गं, मुक्तेः द्वारं, कर्मणः प्रदीपं पुराणेषु निहितम् । अत एव एतद् ज्ञानं विना अयं संसारः अन्धकारमयः । न केवलं कविकुलकलाधरः कालिदासः, भासः, माघः, भारविः, भवभूतिः, श्रीहर्षादिप्रभृतयः पुराणानाम् उपजीव्यतां स्वीकुर्वन्ति अपि तु टालस्टाय-होमर-मिल्टन-शेक्सपियरादयः पौराणिकाख्यानानां चर्चां चक्रुः । अत एव उच्यते यत् जीवमात्रस्य कल्याणाय स्वयमेव नारायणः व्यासरूपो बभूव पुराणानाञ्च रचनां चकार ।

**विस्ताराय तु वेदानां स्वयं नारायणः प्रभुः ।**
**व्यासरूपेण कृतवान् पुराणानि महीतले ।।**

इदानीं विश्वस्मिन् सम्प्रदायवादः, धर्मवादः, देववादः, पन्थवादः, जातिवादः, अनेके वादाः दरीदृश्यन्ते तत् कारणं अस्माकं मूढता एव । किम् वयं न जानीमः ? गणेशपुरीनिवासी शक्तिपातप्रदायकः बाबामुक्तानन्दस्य उपदेशवाक्यम् 'परस्पर देवो भव' अस्यैव वाक्यस्य प्रामाण्यं गीतायां भगवता श्रीकृष्णेन प्रोक्तम् 'परस्परं भावयन्तः' इति। एतयोः वाक्ययोः सामञ्जस्यम् अस्माभिः यत्र दृश्यते पठ्यते च तत्तु पुराणेष्वेव ।

**शिवस्य हृदयं विष्णुर्विष्णोश्च हृदयं शिवः ।**
**उभयोरन्तरन्नास्ति यः पश्यति स मूढधीः ।।**

अपि च गीतायाम् उच्यते –

**यो यो यां यां तनुं भक्तः श्रद्धयार्चितुमिच्छति ।**
**तस्य तस्याचलां श्रद्धां तामेव विदधाम्यहम् ।।**

पुराणेषु क्वचित् क्वचित् भिन्न-भिन्नकल्पानां समतायाः विषमतायाश्च चर्चा क्रियते । सा तु ऋषिभिः निराक्रियते विद्वद्भिः अवगम्यते च ।

**क्वचित् क्वचिद् पुराणेषु विरोधो यत्र दृश्यते ।**
**कल्पभेदादिभिस्तत्र वयवस्था सद्भिरिष्यते ।।**

धार्मिकदृष्ट्या, ऐतिहासिकदृष्ट्या, भौगोलिकदृष्ट्या च पुराणानामुपयोगिता अतुलं वर्तते । पुराणानि भारतीयसंस्कृतेः सनातनधर्मस्य च प्राणभूतान्यङ्गानि ऋषिभिः उररीक्रियन्ते। पुराणानां सामाजिकदृष्ट्यापि च उपयोगिता अवर्णनीया ।

विविधसंस्काराणां वर्णनं, पारिवारिकसम्बन्धस्य विवेचनं, गुरुशिष्ययोः सम्बन्धस्य उपस्थापनं, राजधर्मादिवर्णनं, समाजशास्त्रीयं महत्त्वं पुराणेषु यथास्थानं वर्ण्यते । पुराणेषु श्रीमद्भागवतस्य गुणगौरवं भावोत्कर्षत्वञ्च नितरां प्रतीयते । अस्य सत्यमिदं वचनम् –

**श्रीमद्भागवतं पुराणतिलकं यद्वैष्णवानां प्रियं**
**यस्मिन् पारमहंस्यमेवममलं ज्ञानं परं गीयते ।**
**यत्र ज्ञानविरागभक्तिसहितं नैष्कर्म्यमाविष्कृतं**
**तच्छृण्वन् प्रपठन् विचारणपरो भक्त्या विमुच्येन्नरः ।।**

एवं विवेचनेन पुराणानां महत्त्वमुपयोगिता च सर्वथा प्रसिध्यति । उक्तञ्च नारदीयपुराणे –

**वेदार्थाधिकम्मन्ये पुराणार्थं वरानने ।**
**वेदाः प्रतिष्ठिताः सर्वे पुराणे नात्र संशयः ।।** (ना.पु.२.२४.१७)

धर्मशास्त्रविषये अस्माभिः विचार्यते चेत् शास्त्रानुकूलव्यवहारो धर्मः, तत्प्रतिकूलस्तु अधर्मः । यथा तिलेषु तैलं, दुग्धे घृतं, प्राणिषु प्राणाः, तथैव आध्यात्मिकजीवने धर्मोऽपि प्राणभूतः । धर्मशब्देन साधारणतः जनाः नित्यनैमित्तिकं विधानमवगच्छन्ति । भारतीयपरम्परायां धर्मशब्दः प्रकर्षेण व्यापकः । धर्मस्य भेदद्वयं स्वीक्रियते लोकधर्मः, शास्त्रधर्मश्च । धरति लोकान् ध्रियते पुण्यात्मभिः इति वा व्युत्पत्तौ तत्त्वदर्शनस्य विचारं विना अदृश्यम् अज्ञातम् अस्पष्टं सम्भावितं नियन्तारं प्रसन्नं कृत्वा यस्मात् वयं भौतिकफलं वाञ्छामः स लोकधर्मः । 'शिष्यते अनेन इति शास्त्रमिति' व्युत्पत्तौ शास्त्रधर्मविषये उच्यते –

**प्रवृत्तिश्च निवृत्तिश्च पुंसां येनोपदिश्यते ।**
**तद्धर्माश्चोपदिश्यन्ते शास्त्रं शास्त्रविदो विदुः ।।**

अत एव शास्त्रधर्मप्रसङ्गे गीतायां श्रीकृष्णेन उक्तम् –

**यः शास्त्रविधिमुत्सृज्य वर्तते कामकारतः ।**
**न स सिद्धिमवाप्नोति न सुखं न परां गतिम् ।।**
**तस्माच्छास्त्रं प्रमाणं ते कार्याकार्यव्यवस्थितौ ।**
**ज्ञात्वा शास्त्रविधानोक्तं कर्म कर्तुमिहार्हसि ।।**

एवं विवेचनेन तत्त्वदर्शनाभिज्ञानपूर्वकं लोकव्यवस्थापनञ्चापि कुर्वन् सोपानक्रमेण मोक्षं प्रति नयति सः शास्त्रधर्मः । शास्त्रधर्मस्य सोपानमार्गे

राष्ट्रनियामकधर्मः, समाजनियामकधर्मः, कुटुम्बनियामकधर्मः, शरीरनियामकधर्मः, इन्द्रियनियामकधर्मः, मनोनियामकधर्मः, आत्मदर्शनप्रयोजकधर्मः, इति बहवः धर्माः समागच्छन्ति । मनुष्यपशुसमवाये धर्म एव भेदकरूपेण वर्णितः । यदि नाम मानवो निम्नोक्तदशभिर्लक्षणैर्विक्युक्तः स्यात् तर्हि स सर्वं जानन्नपि पशुधरातलादपि अधस्तात् पतति । धर्मलक्षणं यथा –

**धृतिः क्षमा दमोऽस्तेयः शौचमिन्द्रियनिग्रहः ।**
**धीर्विद्या सत्यमक्रोधो दशकं धर्मलक्षणम् ।।**

एतदतिरिक्तम् एकपक्षीयं लक्षणमपि केनाऽपि उद्यते यथा– **'अहिंसा परमो धर्मः'** **'परोपकाराय पुण्याय पापाय परपीडनम्'** **'धारणाद् धर्ममित्याहुः धर्मो धारयते प्रजाः'** एतेषु एकं ग्राह्यम् इति कथयतां विचारशून्यता वर्तते । नास्तिकदर्शनेषु चार्वाकदर्शनस्य सर्वप्रथमं स्थानं वर्तते । चार्वाकमते देहातिरिक्तस्य आत्मनः अस्तित्वं नास्ति, प्रमाणेषु प्रत्यक्षप्रमाणमेव स्वीक्रियते । 'ऋणं नीत्वा घृतं पिबेत्' वाक्यं मनसि निधाय यशप्राप्तिः, अर्थसंग्रहः, भौतिकजीवनस्य उत्कर्षः, पदप्राप्तिः, येन केनापि प्रकारेण शरीरस्य रक्षा एव सर्वकर्मणः लक्ष्यं वर्तते । परिच्छिन्नस्वार्थं विहाय परोपकाराय यत् कर्म क्रियते तदपि तस्य कर्मणः उद्देश्यं भौतिकजीवनस्य उत्थानमेव । परलोकवादिनः पुनर्जन्मवादिनश्च यादृशं धर्मस्वरूपं स्वीकुर्वन्ति तादृशं नास्ति एतेषां मते । इमे तु लौकिकजीवनस्य साधनमात्रम् धर्मस्वरूपं प्रतिपादयन्ति । अतः जीवमात्रस्य येन कर्मणा लौकिकोत्कर्षः सिद्धः भवति सः धर्मः ।

जैनसम्प्रदायवादिनः पुनर्जन्म,परलोकञ्च मत्वा देहातिरिक्तत्वेन आत्मानं स्वीकुर्वन्ति । पुण्य–अनुष्ठानेन यस्य प्राप्तिर्भवति सः सूक्ष्मपरमाणुरूपः धर्मः । तं धर्मं जैनाः 'पुद्गल' इति नाम्नः सम्भाषन्ते । तेनैव धर्मेण धर्मात्मनः शरीरस्य सृष्टिः भवति । अतः अस्माभिः पुण्यकर्म कर्तव्यम् ।

अत एव न्यूनपक्षीयं लक्षणं विस्मृत्य धर्मस्य सर्वविधं पक्षं स्वीकृत्य ऋषिभिः बहुविधानि लक्षणानि अनूदितानि ।

१. **यतोऽभ्युदयनिःश्रेयससिद्धिः स धर्मः ।** (वैशैषिकसूत्र १.१.२)[४]

२. **चोदनालक्षणोऽर्थो धर्मो ।** (जैमिनीय–धर्ममीमांसासूत्र १.१.२ )[५]

३. **श्रुति–स्मृतिविहितो धर्मः, तदलाभेशिष्टाचारः प्रमाणः ।**
(वसिष्ठधर्मसूत्र १.४.५ )[६]

४. **वेदोक्तः परमो धर्मः स्मृतिशास्त्रगतोऽपरः ।**
**शिष्टाचारोऽपरः प्रोक्तस् त्रयोधर्माः सनातनः ।।**
(महाभारत , अनुशासन १४१.६५)[७]

५. **श्रुति-स्मृतिभ्यां कथितं यत् स धर्मः प्रकीर्तितः ।**
**अन्यशास्त्रेण यः प्रोक्तो धर्माभासः स उच्यते ।।**
(देवीभागवत ७.३९.१५ )[८]

६. **श्रुति-स्मृती उभे नेत्रे पुराणं हृदयं स्मृतम् ।**
**एतत्-त्रयोक्त एव स्याद् धर्मो नान्यत्र कुत्रचित् ।।**
(देवीभागवत ११.१.२१ )[९]

७. **वेदप्रणिहितो धर्मो ह्यधर्मस् तद्विपर्ययः ।**
**वेदो नारायणः साक्षात् स्वयम्भूरिति शुश्रुम ।।** (भागवत ६.१.१४०)[१०]

८. **श्रुति-स्मृतिपुराणेषु प्रोक्तो धर्म : सनातनः ।**
**वर्णाश्रमधर्मरूपेण निषेव्यः सर्वदा जनैः ।।**
(स्कन्दपुराण ब्रह्मखण्ड ३.११.१७ )[११]

९. **वेदोऽखिलो धर्ममूलं स्मृतिशीले च तद्विदाम् ।**
**आचारश् चैव साधूनामात्मानस् तुष्टिरेव च ।।** (मनुस्मृति २.६)[१२]

१०. **विद्वद्भिः सेवितः सद्भि नित्यमद्वेषरागिभिः ।**
**हृदयेनाऽभ्यनुज्ञातो यो धर्मस् तं निबोधत ।।** (मनुस्मृति २.१ )[१३]

एतेषु लक्षणेषु धर्मस्य कीदृशं विशिष्टं व्यापकं स्वरूपं वर्तते । किन्तु इदानीं कराले कलिकाले सर्वे स्वमतानुसारम् धर्मशास्त्रस्य व्याख्यानम् कुर्वन्ति, कथयन्ति च मया यत् क्रियते स एव धर्मः । तस्यैव प्रतिफलं आतंकवादः, हिंसावादः। प्रायशः जनाः धनलोलुपाः वर्तन्ते । ते तु धनप्राप्तये किमपि अनिष्टं कार्यं कर्तुं शक्नुवन्ति । किन्तु विवेकिनो जनाः स्वकुलस्य, समाजस्य, राष्ट्रस्य च कल्याणाय एनम् अधर्मं परिजहति। पुरुषार्थचतुष्टयस्योपलब्धिरपि धर्मादेव सञ्जायते । प्राचीनकाले ऋषयः महर्षयः राजानश्च धर्मपन्थानुयायिनः भवन्ति स्म इति अद्यापि सर्वे जानन्ति । तदनन्तरम् इतिहासपुराणादीनाम् पर्यालोचनेन इदमेव दृष्टिपथमायाति यद् ये ये राजानः महापुरुषाश्च स्वं स्वं धर्मं न त्यक्तवन्तः तेषाम् अजरम् अमरं च यशः शरीरम् अद्यापि स्थितमस्ति,भविष्यति काले स्थास्यति च । प्रसङ्गेऽस्मिन् –'स्वधर्मे निधनं श्रेयः परधर्मो

भयावहः' इति सूक्तेः अक्षरशः समर्थकं प्रतापशालिनं महाराणाप्रतापं किं वयं कदापि विस्मरिष्यामः ? यत् तेन आत्मनः धृतिशीलतायाः परिचयः घासस्य रोटिकाः खादतः स्वबालकान् अवलोक्यापि प्रदत्तः । वयं कामयामहे यदस्माकं भारते पुनरपि तादृशाः धर्मधुरन्धराः भवेयुः । यद्यपि अस्माकं शरीरे धर्मनिरोधकानि कामक्रोधादीनि बहूनि तत्वानि वर्तन्ते । धार्मिककार्येषु तेषां कामादीनां चिन्तनमपि भवति, किन्तु चिन्तने नास्ति हानिः, प्रयोगे दोषः । अस्मिन् प्रसङ्गे एका कथा मनसि आगच्छति ।

कश्चन आश्रमः । आश्रमे बहवः शिष्याः । कदाचित् कश्चन शिष्यः गुरुम् उपसर्प्य अवदत् – गुरुववर्य ! यदा अहं शारीरककार्यं कुर्वन् भवेयम्, यदा च एकान्ते भवेयं तदा सर्वदा निषिद्धानाम् एव वस्तूनां स्मरणं भवति । यानि मम हिताय न भवेयुः तेषां प्राप्तये इच्छा उत्पद्यते । एवं चेत् मम प्रगतिः कथं स्यात् ? किं करणीयम् इत्येव न ज्ञायते । एतस्याः दुरवस्थायाः स्मरणात् मनः उद्विग्नं भवति । गुरुः उत्तरं किमपि न अवदत्। मन्दहासमात्रं प्रकटयत् सः । शिष्यः पुनः अपृच्छत्– 'आचार्य ! मम प्रश्नस्य समाधानं किम् ? अहं कथं प्रगतिं साधयेयम् ? इति ।

गुरुः मन्दहासं प्रकटयन् उत्थाय ततः गच्छन् हस्तसङ्केतेन तं शिष्यम् असूचयत् –' माम् अनुसर' इति । ततः तौ आश्रमात् बहिः गतवन्तौ । समीपे एव स्थितम् एकं कण्टकसस्यं प्रदर्श्य गुरुः अपृच्छत्– इतः किं ज्ञायते त्वया ? एतत् तु कण्टकमयं सस्यम् । घोरः विषांशः अपि अस्ति अस्मिन् श्रुतं मया । अस्य दर्शनात् तव शरीरे विषप्रवेशः जातः किम् ? न । केवलेन दर्शनमात्रेण शरीरे विषयप्रवेशः कथं भवेत् ? एतस्य विषसस्यस्य पर्णानि, फलं, मूलं, वा यदि सेव्येत तर्हि एव कश्चित् विषस्य परिणामं प्राप्नुयात् ।

तदा गुरुः अवदत्– 'निषिद्धविषयाणां विषये अपि इयमेव नीतिः अन्विता भवेत् । मनसि तेषां सञ्चारतः न कापि हानिः । अधोगतिकारकेषु अंशेषु यावत् वयं प्रवृत्ताः न भवेम, तावत्, तेषां स्मरणतः किमपि कष्टं न भवेत् । किन्तु पुनः पुनः तेषु प्रवृत्तिः भवेत् इत्यतः सद्विषयाः एव चिन्तनीयाः इति उच्यते ।

सद्विचाराः एव मनसि यथा भवेयुः तथा करणाय किं करणीयम् ? शिष्यः पुनः अपृच्छत् । आचार्यः उक्तवान् । तदर्थं सत्कार्येषु प्रवृत्तिम् अधिकं कुरु । सर्वदा कार्यव्यापृतिः भवेत् । सद्ग्रन्थान् सच्चित्राणि च पठ, सद्वृत्तकथाः शृणु । सज्जनानाम् सहवासम् अधिकम् कुरु । एतस्य सर्वस्य कारणतः सर्वदा मनसि सद्विचाराः एव उत्पद्येरन् ।

भारतदेशे साम्प्रतमपि राष्ट्रनेतारः महता कण्ठेन धर्मनिरपेक्षताम् उद्घोषयन्ति। यदि धर्मनिरपेक्षतायाः पूर्वोक्तोऽभिप्रायः वर्तते तदा भारतीयानां न कापि विप्रतिपत्तिः। ईदृशी धर्मनिरपेक्षता तु अनादिकालतः भारतवर्षे वर्तते। 'स्वधर्मे निधनं श्रेयः परधर्मो भयावहः' इति मतं स्वीकृत्य कदापि कस्यचित् धर्मस्थलम्, पूजास्थनम्, उपासनास्थानम् वा न विध्वंसयन्ति न वा कस्यचित् पत्नीं भगिनीं वा अपहरन्ति। स्वकीयम् अपहारमपि न क्षमन्ते। एतदर्थं प्राणविसर्गमपि कुर्वन्ति। इयमेव वस्तुतः भारतीयानां धर्मनिरपेक्षता वर्तते। ते स्वधर्मं न त्यजन्ति अन्येषां कृतेऽपि बाधां नाचरन्ति। परञ्च ये स्वार्थसाधनतत्पराः, पदलोलुपाः ते अन्यथाऽभिप्रायं धर्मनिरपेक्षतायाः विवृण्वन्ति। ते तु मतसञ्चयं विधातुं स्वधर्ममपि त्यजन्ति, परेषां मतं स्वपक्षे कर्तुं तेषां तुष्टये स्वधर्मध्वंसमपि कुर्वन्ति। एतेषां मूढराजनेतृणां मते सनातनधर्मावलम्बिनां धर्मः साम्प्रदायिकः अतस्त्याज्यः इति कथयन्ति। 'साम्प्रदायिक' शब्दस्य व्याख्याऽपि स्वकल्पिता वर्तते। धर्मनिरपेक्षतायाः अर्थः धर्मध्वंसः एव। एतेषाम् उद्बोधनाय किमपि धर्मपदार्थं विवृणोमि। यतो हि भारतीया संस्कृतिः धर्मप्रधाना वर्तते। मानवेषु मानवताधायकं तत्वं धर्म एवास्ति। धर्महीनाः नराः अपि पशवः कथ्यन्ते। तदुक्तं हितोपदेशे –

**आहारनिद्राभयमैथुनं च समानमेतत् पशुभिर्नराणाम्।**
**धर्मो हि तेषामधिको विशेषो धर्मेण हीनाः पशुभिः समानाः॥**

चतुर्वर्गेषु प्रथमो धर्मः एव प्रथितः, स एव अन्येषाम् अर्थकाममोक्षाणां च मूलं वर्तते। धर्माचरणेनैव सामाजिकं वैयक्तिकं विश्वजनीनं च कल्याणं कर्तुं शक्यते। अत एव आचार्यः विश्वं अनुशास्ति – 'धर्मं चर' इति। अस्मिन् एव प्रसङ्गे व्यासस्य वचनम् –

**धारणाद् धर्ममित्याहुः धर्मो धरयते प्रजाः।**
**यः स्याद् धारणसंयुक्तः स धर्म इति निश्चयः॥**

एतदनुसारं धर्मशब्दस्य व्याख्या सिद्ध्यति, येन मानवः ध्रियते, यो वा मानवं धरति स धर्मः। सः मानवेषु मानवतां सम्पाद्य एव न विरमति अपि तु ऐहिकं पारलौकिकं च श्रेयः प्रेयश्च सम्पादयति। अत एव महर्षिणा कणादेन वैशेषिकदर्शने उक्तम् –' यतोऽभ्युदयनिःश्रेयस्य सिद्धि स धर्मः' अर्थात् येन कर्मणा भौतिकसमृद्धिः; पारलौकिकसमृद्धिः परमानन्दवाप्तिश्च सम्पद्यते स धर्मः। एवम् अवलोक्यते यद् जीवने धर्मस्य सर्वदा उपयोगिता वर्तते। तस्याश्रयणेनैव ऐहिकम् आमुष्मिकं च सुखम्

अवाप्यते ।धर्मो जीवनरक्षकः, सुखशान्तिसंधायकः , सत्कर्मप्रेरकः, दुःखनिरोधकश्चेति सततम्आश्रयणीयम् ।

**सन्दर्भाः**


१. पाणिनिसूत्रम् ४/३/२३
२. पाणिनिसूत्रम् २/१/४९
३. पाणिनिसूत्रम् ४/३/१०५
४. वैशैषिकसूत्र १.१.२
५. जैमिनीय-धर्ममीमांसासूत्र १.१.२ ६.
६. वसिष्ठधर्मसूत्र १.४.५ ७.
७. महाभारत , अनुशासन १४१.६५
८. देवीभागवत ,७.३९.१५ ९.
९. देवीभागवत ११.१.२१ १०.
१०. भागवत ६.१.१४०
११. स्कन्दपुराण ब्रह्मखण्ड ३.११.१७ १२.
१२. मनुस्मृति २.६
१३. मनुस्मृति २.१

पाणिनीया
ISSN-2321-7626
Vol. XXIV, Year VI
विक्रमाब्दः २०७६
ज्येष्ठ-श्रावणमासाङ्कः
मई-जुलाई 2019

# भगवद्गीतायां भगवदुक्तविभूतीनां विस्तरः

दत्तात्रेयदीक्षितः

**यद्यद्विभूतिमत्सत्वं श्रीमदूर्जितमेव वा ।**
**तत्तदेवावगच्छत्वं मम तेजोंशसम्भवम् ।।**[1]

इह खलु जगत्यां ब्रह्मादिस्तम्बपर्यन्तानां सर्वेषां प्राणिनां सुखप्राप्तये दुःखनिवृत्तये च निसर्गतः प्रवृत्तिः दृश्यते । तत्रापि दुःखनिवृत्यर्थं जायमाना प्रवृत्तिः बलवती । अथ सर्वो जन्तुः ज्ञानशक्त्यनुसारेण क्रियाशक्त्यनुसारेण च सुखावाप्तये च प्रयतते इति सत्यम् । किन्तु यादृशसुखावाप्त्यर्थं कश्चित्प्रवर्तते तादृशसुखम् अनुभवन् नित्यः ततोऽधिकसुखावाप्तये प्रवर्तते एव । न तु कश्चिदपि विरमति । एवं लोके अनुभूयमानानि शब्दस्पर्शादिविषय–सम्बन्धजन्यानि नानाविधानि वैषयिकसुखानि प्रसिद्धान्येव लोके । किन्तु तेष्वपि चरमावधिः न ज्ञायते । अनुभूयमानेष्वेव च वैषयिकेषु सुखेषु कस्य वा जायस्त्वं, कस्य वा न, इत्यपि निश्चेतुं शक्यते व्यवहारवद्भिरपि लोके । यतः लोके कश्चिन्मधुरशब्दश्रवणे सविशेषं लुब्धः भवति । कश्चित्सुखाकारकस्पर्शमधिकं मन्यते । कश्चित् सौन्दर्याद्यवलोकेन आसज्जते । एवं लोके विभिन्नाः आनन्दाः अनुभूयन्ते । तत्सर्वमपि आनन्दस्वरूपसैव परमात्मनः लेशमात्रानन्दाः लोके सर्वत्र अपि दृश्यते।

**एतसैवानन्दस्य अन्यानि भूतानि मात्रामुपजीवन्ति । इति ।**

एतदज्ञात्वा अन्धकारे पतिताः जीविनः एतादृशं सुखं बहुधा अनुभवन्तः दुःखभूयिष्ठे संसारे संसरन्ति । दृष्टान्तं प्रयच्छति यथा कस्तूरीमृगः स्वस्मिन्नेव विद्यमानं गन्धम् अविज्ञाय तत्प्राप्त्यर्थं प्रदेशात् प्रदेशान्तरम् अटित्वा निष्फलो भवति, तद्वत् लोकोऽपि स्वस्मिन्नेव विद्यमानमानन्दस्वरूपमात्मानम् अविज्ञाय तत्प्राप्त्यर्थं संसारे साभिसन्धिः कर्म कुर्वन् संसरति।

**कुर्वते कर्म भोगाय कर्म कर्तुं च भुञ्जते ।**
**नद्यां कीटा इवावतादवर्तान्तरमाशु ते ।**
**व्रजन्तो जन्मनो जन्म लभन्ते नैव निवृतिम् ।**[२]

अतः निरतिशयसुखप्राप्त्यर्थ ओतप्रोतरूपेण विद्यमानस्य परमात्मनः दर्शनं नितान्तमावश्यकम् । शमदमाद्यनुष्ठाननिष्ठस्य एतत्सिध्यतीत्यत्र नास्ति संशयलेशः ।

परन्तु यद्यपि समस्तमिदं जगत् परमात्मनः एव अंशभूतम् अर्थात् ब्रह्मणः एव समुद्भूतम् । ब्रह्मादिस्तम्बपर्यन्तेषु परमात्मनः अंशाः एव अनुवर्तन्ते । एषः एव विषयः विस्पष्टं निरूपितः भगवद्गीतायाः दशमे अध्याये । अर्थात् समग्रे द्वितीये षट्के । तस्मात् सप्तमे अध्याये त्वं पदवाच्यार्थः प्रस्थापितः । पुनश्च तदुपासनाच्च क्रममुक्तिः इति अष्टमे अध्याये प्रोक्तम् । अर्थात् सप्तमे अष्टमे च अध्याये भगवतः तत्वं सोपाधिकं, निरुपाधिकञ्च सविशेषबोधोपायोगिन्यः प्रकाशिताः । सप्तमे तावत् रसोऽहमप्सु कौन्तेय, अष्टमे च अधियज्ञोऽहमेवात्र, नवमे तावत् अहं क्रतुः अहं यज्ञः इति दर्शितम् ।

तस्य च विभूतयः सोपाधिकस्य ध्याने, निरुपाधिकस्य च ज्ञाने, उपाधिभूताः अंशाः दर्शिताः । तत्सिद्धये स्वविभूतिः केषुचिदेव पदार्थेषु भगवद्बुद्धिविधानार्थं तावद्दर्श्यते दशमे अध्याये। तर्हि विभूतिर्नाम का इति प्रश्न उद्भवति। तस्य उत्तरत्वेन भण्यते यत् -
विभूतिर्नाम का? सविशेषनिर्विशेषरूपप्रतिपत्युपयोगिन्यः इत्यर्थः ।

**एतां विभूतिं योगञ्च मम यो वेत्ति तत्वतः ।**
**सोऽविकम्पेन योगेन युज्यते नात्र संशयः ।।**[३]

यः मम विभूतिं तत्त्वेन यथाविधं जानाति सः अविकम्पस्थितिं प्राप्नोति । उपासनार्थं विभूतयः निर्दिष्टाः । विभूतिषु सजातीय-विजातीयरूपेण भेदाः सन्ति । तथाऽपि प्राधान्येन उत्तमाः, उत्तमत्वप्रदाश्चेति द्विधा विभागाः दर्शिताः ।

१. तत्र प्रत्यक्षाः उत्तमाः विभूतयः ।
२. तिरोहिताः उत्तमत्वप्रदाः विभूतयः ।

तत्र तावत् उत्तमत्वप्रदाः विभूतयः द्विविधाः, विजातीय-उत्तममत्वप्रदाः, सजातीय-उत्तमत्वप्रदाः इति ।

१. नक्षत्राणाम् अहं शशी ।इति । भ.गी.१०.२१
२. वरुणो यादसामहम् ।इति । भ.गी.१०.२९

इत्याद्याः विजातीयोत्तमत्वप्रदाः विभूतयः, अन्याः तु सजातीयोत्तमत्वप्रदाः विभूतयः।

अत्र प्रकरणे षष्ठी द्विविधा, निर्धारणे षष्ठी पुनश्च सम्बन्धषष्ठी चेति ।

१. आदित्यानाम् अहं विष्णुः इत्यादिषु निर्धारणे षष्ठी ।
२. नक्षत्राणामहं शशी इत्यादिषु संबन्धे षष्ठी ।

चन्द्रस्य विजातीयत्वेन नक्षत्रेभ्यः निर्धारणायोगात् षष्ठ्यर्थः संबन्धः ।

१.	भूतानामस्मि चेतना इत्यादिषु आश्रयाश्रयिभावः विद्यते ।

२.	नक्षत्राणामहं शशी  इत्यादिषु स्वस्वामिभावः संबन्धः प्रतीयते ।

आश्रयाश्रयिभावसंबन्धषष्ठीस्थले अर्थात् भूतानामस्मि चेतना, तेजस्तेजस्विनामहम्, नीतिरस्मि जिगीषताम्, इत्यादिषु चेतनाश्रितेषु धर्मेषु उत्कर्षाधायकत्वेन च उत्तमः धर्मः चेतनारूपः, तेजोरूपः, नीतिरूपश्चेति सोऽहम्। तस्य धर्मस्य स्वाश्रयोत्तमत्वप्रदत्वरूपं यदुत्तमत्वं तत्प्रदोऽहम् इत्यादिरीत्या अर्थः ज्ञेयः ।[४]

अत्र मया केषाञ्चन प्रसिद्धानां विभूतीनां विषये निरूपणं क्रियते ।

**०१.सर्पाणां वासुकिः**

सर्पाश्च नागाश्च जाति भेदत् भिद्यन्ते । तत्र सर्पगणस्य अधिपः वासुकिः । सर्पाणामस्मि वासुकिः इति भगवान् ब्रवीति । तत्र अस्ति कश्चन विशेषः ।

सर्पाः एकशिराः । एवं सर्पाणाम् एकशिरसां मध्ये राजा वासुकिः अहमस्मीति भगवतः आशयः । कश्यप–कद्रु पितरौ वासुकेः । वासुकिः भोगावति नगर्याः अधिपः आसीत् । एनं वासुकिं देवाः असुराश्च समुद्रमथनकाले रज्जुत्वेन उपयुज्यमानः स्वाभीष्टम् अवाप्नुवन् । शङ्करः एनं वासुकिं तस्य कण्ठे धरतीति कारणात् तस्य अतीव प्रियश्च आसीत् । अष्टौ सर्पाः प्रसिद्धाः ते तावत् .........

अनन्तः , वासुकिः , पद्मा , महापद्म , तक्षकः , कर्णेकटः, कुबिका , शङ्खः , इति ।

महाभारतस्य आदिपर्वणि शौनकः एवं प्रकारेण अपृच्छत् ।

**ये सर्पाः सर्पतस्त्रेस्मिन् पतिता हव्यवाहने ।**

**तेषां नमामि सर्वेषां श्रोतुमिच्छामि सूतजा ।।**[५]

जनमेजयस्य यज्ञे ये सर्पाः आहुतिरूपेण पतिताः तेषां सर्वेषां नामानि उच्यन्तामिति स्वाशयं ददर्श । तदा सूतः ब्रवीति, यज्ञे मृतानां सर्पाणां संख्या एव अगणिता विद्यते । तस्मात् कारणात् तेषां सर्वेषां नान्मः कथनं दुःशकमिति ऊचिरे । तदा सूतः अवदत् यज्ञे मृतानां प्रमुखानां नाम वक्ष्यामीति अवदत् । आदिशेषः, वासुकिः, तक्षकः, कर्कोटकः, मणिनागः, पिञ्चरकः, एलापत्रः, अनीलः, नीलः, पोतकः, अश्वतरः, इत्येवमादि सर्पाणां नाम अकथयत्।

पृथिव्यां चरणशीलानां सर्पेति नाम । महाभारते आदिपर्वणि एवम्मुल्लेखः विद्यते । कद्रुपुत्राः सर्वेऽपि आदिशेषादयः सर्पाः । सर्पाश्च असंख्याः । सर्पेषु केचन क्रूराः , विवेचनरहितस्स्वभावाः च आसन् । एतद्दृष्ट्वा कद्रु : कृरान् सर्पान् शशाप । अग्रे जनमेजयः सपर्यागं करिष्यति तत्र भवन्तः सर्वे विनाशं प्राप्नुवन्तु इति । सर्पाणां मधे ज्येष्ठः आदिशेषः, द्वितीयः वासुकिः । तत्र आदिशेषः स्वानुजानां क्रूरस्वभावं दृष्ट्वा वैराग्यसम्पन्नो भूत्वा सर्वान् त्यक्त्वा अरण्यं गत्वा तपस्तेपे । अयमेवाग्रे ब्रह्मणः आदेशानुसारं समग्रस्य भूमण्डलस्य

भारमवहत् । किन्तु अस्यापेक्षया वासुकि : एव श्रेष्ठः इति भगवतः कृष्णस्य वचनम् । सर्पाणामस्मि वासुकिः इति । यतः स्वसंसारे बहुकष्टमस्ति चेदपि, स्वानुजाः सत्पथभ्रष्टाः, अविवेकिनः, क्रूरिणः चेदऽपि तान् सत्पथे आनेतुं प्रयत्नं चकार ।

यद्यपि स्वमाता कद्रूः शापं दत्तवति , तथाऽपि तस्य औचित्यं , ततः विमोचनं समेषां कथं भवेत् इति अचिन्तयत् । न कदापि धर्ममार्गात् प्रच्युतिं न सहते-स्म । यद्यपि स्वानुजाः सर्पाः यागस्य स्थगनार्थं प्रयतमानाः आसन् । पुनश्च सर्पाः बहून् अधर्मात्मकान्, कुत्सिताम् , उपायान् सूचितवन्तः, तथाऽपि वासुकिः स्वयं धर्ममार्गे एव तिष्ठन् सर्वान् अपि धर्माधारेण एवम् उपदेशं ददौ । तस्माद्धेतोः भगवान् सर्पाणामस्मि वासुकिः इति वासुकिभावेन उपास्यो भवति । अयं धर्मी आसीदिति प्रमाणं स्वयं ब्रह्मणः एव वचनमस्ति ।

विनाशयन्ति ये पापाः न तु धर्मचारिणः इति ।

**०२. वेदानां सामवेदः**

नित्यो वेदः धर्मार्थकामादीनां विद्यते साधनत्वेन , तादृशस्य नित्यवृक्षस्य सामवेदः पुष्पवत् प्रतिभाति । तेन च वेदस्य सार्थकतां प्रयच्छति । तदुक्तम्.........

सामवेदः एव पुष्पम् ।[६]

वाचः ऋग्रसः ऋचः सामरसः साम्न उद्गीथोरसः।[७] वागिन्द्रियं रूचः सारभूतम्, तद्वत् साम आनन्दप्रदायकत्वात् ऋचः सारभूतः वर्तते । ससामभिः उन्नीयते स्वर्गलोकम् ।[८] सामैव यशः।[९]

चतुर्मुख-ब्रह्मा उत्तरस्यां दिशि सूर्यः सन्ध्याकाले च सामगानं कुरुतः इत्यनेनैव हेतुना अपि अवगम्यते अस्य वैशिष्ट्यं शिखरप्रायमिति । सामेति विष्णोः प्रतिरूपम् , तदुक्तम् -

त्रिसामा सामगसाम निर्वाणं भेषजं भिषक् ।[१०]

चेतनं प्रतिभाति प्राणिषु प्राणस्य सत्तात्वदशायाम् , तादृशः प्राणैव यज्ञे सामेति पदेन उच्यते । आदित्यस्य उन्नयनमपि सामगानेनैव सिध्यतीति परिणितमतयः वदन्ति । सामवेदस्य अस्तित्वदशायामेव यज्ञस्य अस्तित्वं नान्यथा ।

तदुक्तम् ...........

अयज्ञो वा एषयोऽसाम इति । यथा रूढं साम्प्रदायिकेषु मृतानां पितृणां सन्तोषप्रदायकत्वं, तादृशः सन्तोषः ऋग्मन्त्रेण पितरः प्राप्नुवन्ति । यजुषः मन्त्रश्रवणेन पितामहाः तुष्यन्ति । परन्तु साममन्त्रश्रवणेन प्रपितामहाश्चापि तुष्यन्ति । अनेनापि ज्ञायते साम अन्येषामपेक्षया श्रेष्ठं स्थानं प्राप्नोतीति ।

सवा इदं सर्वं भूतमसृजत .......तस्मादाहुः सामैवान्नमिति ।[११]

सामवेदे सप्तस्वराः प्रतिभान्ति । तत्र तावत्

१. कृष्णस्वरेण = देवताः ।

२. प्रथमेन स्वरेण = मनुष्याः ।

३. द्वितीयेन स्वरेण = गन्धर्वाप्सरसाः ।

४. तृतीयेन स्वरेण = पशवः ।

५. चतुर्थ्येन स्वरेण = पितरः अण्डजाश्च ।

६. पञ्चमेन स्वरेण = असुराः राक्षसाश्च ।

७. षष्ठेन स्वरेण = ओषधि–वनस्पतयः, समस्तं जगत् ,जीव्यतीति ख्यापयति । एवं समस्तस्य जगतः अन्नरूपेण परिणमते सामवेदः । अनेनापि हेतुना साम्नः महीयत्वं प्रखरं ज्ञायते। ऋग्यजुस्सामेति मन्त्राणां त्रैविध्यम् । तत्र छन्दोबद्धमन्त्राः ऋक्षु , छन्दोरहितमन्त्राः यजुषि , गानोपयोगिमन्त्राः साम्नि प्रविभक्तानि विद्यन्ते। ऋक्षु प्राचीनानां महर्षीणाम् अनुभवानां सारः , यजुर्वेदे कर्माचरणस्य विषये उल्लेखः , पुनश्च सामवेदे गानरूपेणमन्त्राः संङ्ग्रहीताः विद्यन्ते । तस्माद्धेतोः श्रोतारः गायकाश्च आनन्दं प्राप्नुवन्ति ।

सामन् पदस्य अर्थस्तावत् छान्दोग्योपनिषदि भणितं यत् .................

परिपूर्णाः जनाः सामन् पदेन अभिधीयन्ते। उपासनेष्वपि साम्नः वैशिष्ट्यम् उक्तम् ।

यत् .....समस्तस्य खलु साम्न उपासनं साधु । यत्खलु साधु तत् सामेति आचक्षते । यत् असधु तत् असामेति । चतुर्णी वेदानां मध्ये गानमाधुर्येण उत्कृष्टः सामवेदः ।

सामवेदवैशिष्ट्यस्य तथ्यम् –

वेदो नाम न पुस्तक विशेषस्य नामधेयम् । किन्तु ऋषीणाम् ऋतम्भरा प्रज्ञया आविर्भूतस्य समस्तगानपूगस्य नामधेयं वेदः इति । सामवेदे अपि विशेषगानमन्त्राणां समूहः विद्यते। तत्र साम नाम भावना, गतिः । वेदो नाम ज्ञानम् । अनयोः संयोगे सति विशिष्टम् ईश्वरसाक्षात्कारादि उत्कृष्टं फलं प्राप्यते । सन्तः तुलसीदासः कथयति भवानिशङ्करौ वन्दे अनयोः मेलनेन शिष्टाः पश्यन्ति स्वातन्त्र्य स्थानम् ईश्वरम् । सान्तस्थामीश्वरम् ।

सामगानं नाम न केवलं देवतामुद्दिश्य स्तोत्राणां पठनम्, परन्तु साम्नः सङ्गीतक्षेत्रे, नृत्यक्षेत्रे, रोगनिवारणे महत् योगदानम् अस्ति । समग्रस्य सङ्गीतस्य प्रवर्तकः साम इति वक्तुं शक्यते । यतः साम्नि २२ श्रुतीनां उल्लेखः विद्यते यच्च सङ्गीते नितराम् अपेक्षिताः । ते यथा १. तीव्रा २. कुमुद्वती ३. मन्दा ४. छन्दोवती ५. दयावती ६. रञ्जनी ७. रतिका ८. रौद्री ९.क्रोधा १०. वर्जिका ११.प्रसारिणी १२.प्रीतिः १३. मार्जनी १४. क्षितिः १५. रक्ता १६. सान्दीपिनी १७. आलापिनी १८. मदन्ती १९. रोहिणी २०. रम्या २१ उग्रा २२. क्षोभिणी इति । एतेषां कस्मात् षड्जादि सप्तसु स्वरेषु अन्तर्भावयन्ति । यथा ...........

१) षड्जः – तीव्रा, कुमुद्वती,मन्दा, छन्दोवती ।

२) ऋषभः – दयावती, रञ्जनी, रतिका ।

३) गान्धारः – रौद्री, क्रोधा ।

४) मध्यमः – वज्रिका, प्रसारिणी, प्रीतिः, मार्जनी ।

५) पञ्चमः – क्षितिः, रम्या, सान्दीपिनी, आलापिनी।
६) धैवतम् – मदन्ती, रोहिणी, रम्या।
७) निषादः – उग्रा, क्षोभिणी।

इति पुनश्च उपनिषत्सु साम्नः स्वरूपं वर्णितम् ....

या ऋक् तत् साम।[१२]

ऋचि अध्यूढं साम।[१३] पतिः साम। पत्नी ऋक् इति परिगण्यते।

अमोऽहमस्मि सा त्वं सामाहमस्मि ऋक् त्वम्, द्यौरहं पृथिवी त्वं ताविव सम्भवाव प्रजामाजनयाव है।[१४]

सामः नाम आलापनं गानमहमस्मि पतिः, ऋक् त्वम् इत्यादि। वाक् च प्राणश्च ऋक् च साम च सा च आमश्चेति तत्साम्नः सामत्त्वम् सहस्र शाखा साम। एवं सर्वमवलोक्य यदि चिन्तयामः तर्हि वेदानां सामवेदोऽहमस्मि इति वचनम् औचित्यपूर्णं भजते।

**०३. छन्दसां गायत्री**

शिक्षाग्रन्थे छन्दसः लक्षणमाह–छन्दः पदौ–तु वेदस्य इति मनेष्येभ्यः स्थातुं यथा पदौ अपेक्षेते तथा वेदानां चिरस्थायित्वसिद्धये अपेक्षितं छन्दः।

गायत्री, उष्णिक्, अनुष्टुप्, बृहती, पङ्क्तिः, त्रिष्टुप्, जगती, प्रागाथा, सङ्कीर्णम् इत्येवं छन्दस्सु भेदाः दृष्यन्ते। तत्र तावत् गायत्री छान्दः सर्वश्रेष्ठं स्थानम् आप्नोति। यतः भगवान् ब्रवीति छन्दसामहं गायत्री इति। अनुष्टुपादि छन्दानां समूहे गयत्र्याः अस्ति कश्चन विशेषः। गायन्तं त्रायते इति गयत्री। अथवा गायान् प्राणान् त्रायते इति वा गयत्री।

छन्दसां नियताक्षराणाम् अर्थात् नियताक्षरपादत्वरूपछन्दोविशिशष्टानां मन्त्राणां मध्ये द्विजत्वापादनकत्वेन प्रातरादिसवनत्रयवाचित्वेन च सोम–आहरणेन च सर्वऋचां श्रेष्ठा गयत्री। द्विजातेर्द्वितीयर्जन्महेतुत्वेन प्रातःसवनत्रयव्यापित्वेन त्रिष्टुप्–जगतीभ्यां सोम–आहरणार्थं गताभ्यां सोमो न लब्धः अक्षराणि च हारितनि जगत्या त्रीणि त्रिष्टुभैकमिति चत्वारि।

तृतीयस्यामितो दिवि सोम आसीत्। तं गायत्र्याऽहरत तस्य पर्णमयच्छिद्यत।[१५] तैरक्षरै: सह सोमस्याहरणेन च सर्वश्रेष्ठा गायत्री ऋगहम्। अथवा चतुरक्षराणि हत्वा अग्रे छन्दस्यास्तुतो जगति सोममछ्चापतत् सा त्रीण्यक्षराणि हित्वा जगाम। ततः त्रिष्टुप् सोममच्छापतत सैकमक्षरं हित्वा अपतत्ततः गायत्री सोममच्छापतत सा तानि च अक्षराणि हरन्त्यागच्छत् सोमं च तस्मादष्टाक्षरा गायत्री इत्युपक्रम्य तदाहुः गायत्रीणि वै सर्वाणि सवनानि गायत्री हेवैतदुपसृजमानैः इति शतपथश्रुतेः।

गायत्री वा इदं सर्वं भूतम् इति छन्दोगानाम्। चतुर्विंशत्यक्षरा ततश्चतुरक्षरवृद्धव्युष्णिगादि छन्दसां निष्पत्तिः। सापि परमेश्वरप्रतिपादिका इति मद्विभूतिरुक्ता। प्राणस्य सत्वैव देहः चेतनवानिति व्यवहारः भवष्यति नान्यथा। देहधारकं प्राणमिति इयं गायत्री

गोपायतीति अस्ति तस्या वैशिष्ट्यम् । गायत्र्याः उपासनेन उपासकः सर्वविधदुःखपूगात् त्रायते। अस्य च गायत्रीमन्त्रस्य सविता देवता इत्यतः सवितृमन्त्रः इत्यपि आख्ययते जनैः । गायत्र्याः गुरुमन्त्रः इत्यपि व्यवह्रियते । अत्र विद्यते निमित्तद्वयम् ।

१) वेदारम्भसंस्कारकाले आचार्यः शिष्यं सर्वप्राथम्येन गायत्रीमन्त्रम् उपदिशति । गायत्रीमन्त्रः गयत्री छन्दसा निबद्धः वर्तते । गायत्री मन्त्रस्य छन्दसः च नास्ति वैधर्म्यम् ।

२) अस्य मन्त्रस्य अर्थपूर्वकपठनेन सद्बुद्धेः प्राप्तिः भविष्यति ।

यद गायत्रे अधिगायत्रमासितं त्रैष्टुभाद्वा त्रैष्टुभं निरतक्षत यद्वा जगत्याहितं पदं य इत्तद्विदुस्ते अमृतस्तमानशुः ।

पृथिव्यामग्निः, अन्तरिक्षे वायुः, आदित्यः द्युलोके, अधिष्ठातृदेवता इति यः पुरुषः सर्वं गायत्री ज्ञानेन वेत्ति, सः संसारपूगात् निर्मुक्तो भविष्यति । गायत्री – छन्दसि प्रत्येकस्मिन् पादे अष्टौ अक्षराणि भवन्ति । गायत्री छन्दसि त्रयः पादाः भवन्ति । तस्मात् चतुर्विंशत्यक्षराणि भवन्तीति अवधारितार्थः । विश्वामित्रेण दृष्टे गायत्री मन्त्रे, प्रथमे पादे सप्ताक्षराणि केवलानि सन्ति, तस्मात् अस्याः निचृद् गायत्री इत्युच्यते ।

एकाक्षरा विहीना तु निचृद्गायत्रमुच्यते ।

देवस्तुत्यर्थं गायत्रछन्दान्तर्गत–मन्त्राः सृष्टाः । ते मन्त्राः तैत्तिरीय–आरण्यके उपलभ्यन्ते ।

१. रुद्रगायत्री = तत्पुरुषायविद्महे महादेवाय धीमहि । तन्नो रुद्रः प्रचोदयात् ।

२. विनायकगायत्री = तत्पुरुषायविद्महे वक्रतुण्डाय धीमहि । तन्नो दन्ती प्रचोदयात् ।

३. गरुडगायत्री = तत्पुरुषायविद्महे महासेनाय धीमहि । तन्नष्षण्मुखः प्रचोदयात् ।

४. दुर्गागायत्री = कात्ययनायविद्महे महद्युतिकराय धीमहि । तन्नो दुर्गिः प्रचोदयात् ।

एवं नारायणगायत्री, विष्णुगायत्री इत्यादि भेदाः अपि उपलभ्यन्ते। गायत्रीमन्त्रं रामः अपि जपतिस्म इति बालकाण्डे श्रूयते ।

तस्यर्षेः परोदारा वाचः श्रुत्वा नरोत्तमौ ।
स्नात्वा कृतोदकौ वीरौ जपेतुः परमं जपम् ।।[१६]

विना गायत्री जपं न कश्चन ब्राह्मणो भविष्यति । ब्राह्मणानां गयत्री मतृ स्थानीया । स्वयम् आचार्यशङ्करः छान्दोग्यभाष्ये एवं सूचयिष्यति ......

सत्सु अनेकेषु छन्दस्सु गायत्र्या एव ब्रह्मज्ञानतयोपादानं प्राधान्यात् । सोमाहरणात् , इतर च छन्दोक्षरहरणेन इतरच्छन्दोव्याप्त्या च सर्वसहनव्यापकत्वाच्च यज्ञे प्राधान्यं गायत्र्याः । गायत्री सारत्वाच्च ब्राह्मणस्य मातरमिव हित्वा गुरुतरां गायत्रीं ततोऽन्यत् गुरुतरं न प्रतिपद्यते । अस्माकं भारतदेशे वर्णव्यवस्था बहुपुरातना विद्यते । यथा ब्रह्मणाः, क्षत्रियाः, वैश्याः , शूद्राश्चेति । तत्र त्रैवर्णिकेभ्यः द्विजत्वप्राप्तये योग्यता विद्यते । द्विजाः नाम द्वितीयजन्म प्राप्ताः इत्यर्थः । द्वितीयं जन्म यज्ञरूप पित्रा , गायत्रीरूपा मात्रा च प्राप्यते । गायत्र्याः प्रातिनिध्येन सर्वैः ध्रियते यज्ञोपवीतम् । यथा गायत्र्यां त्रीणि चरणानि सन्ति तथा यज्ञोपवीते त्रयः तन्तवः विद्यन्त।

अस्यां भूमौ अनेके धर्माः सन्ति । तथाऽपि तयोर्मध्ये विरोधाभासाश्च विद्यन्ते । एवं स्थितेऽपि सर्वशास्त्रकाराः, सर्वपक्षीयाश्च एकभावेनैव गयत्रीं अङ्गीकारं चक्रुः । नास्ति अस्याः विशये वैरुध्यं सर्वेषां मनस्सु । गायत्र्याः विषये स्वयं मनुः ब्रवीति .....

भगवान् ब्रह्म वेदत्रयस्यापि सारं गायत्रीमन्त्रस्य चरणत्रये कथयतीति। गायत्र्याः विषये अनेके ऋषयः एवं प्रकटयन्ति यत्.......

१. शङ्खमुनिः =नरकसदृशसंसारसमुद्रे पतितं पुरुषं ततः उद्धरिष्यति , तादृशी सामर्थ्यम् अस्याः । एषा स्वर्गमपि प्रापयति ।

२. शौनकः = गायत्र्याः उपासनेन इह–परलोकयोः अधिकारी भविष्यति ।

३. अत्रिः = महामन्त्रः इति गायत्रीं अभिधत्ते । यतः आत्मशोधने साधनी भूता गायत्री । गायत्र्याः तत्त्वं यो वेत्ति, सः सर्वविधदुःखात् विमुक्तो भवति । नास्त्यत्र संशयः ।

४. महर्षी व्यासः= पुष्पाणां सारः यथा मधुनि संग्रहीतं भवति तद्वत् समस्तस्य वेदस्य सारः गायत्री मन्त्रे संग्रहीतं विद्यते । कार्यसिद्धये यशःप्राप्त्ये च गायत्री आधारभूता विद्यते ।

५. भारद्वाज = ब्रह्मादयः अपि गायत्रीं जपन्ति । अस्याः उपासनेन दोषापनयनद्वारा गुणाधानं च भवति । गायत्रीं कामधेनुः इत्यपि कथयन्ति मनीषिणः । अभीष्टं प्रदास्यतीत्यतः । गायत्री मन्त्रेषु बहवः भेदाः दृष्यन्ते । उदाहरणार्थं ब्रह्मगायत्री, विश्वामित्रगयत्री, पञ्चावसानगायत्री , सम्पुटगायत्री इत्येवमादि । एवञ्च पूर्वपरावलोकनेन बुध्यते यत् गायत्री छन्दसामहम् इति भगवद्वचसि अस्ति निमित्तमिति ।

## ०४. नारीणां कीर्त्यादि

प्रसूत्यां जनम्यास कन्या दक्षः प्रजापतिः।
श्रद्धा लक्ष्मीधृतिस्तुष्टिः पुष्टिर्मेधा क्रिया तथा ।।
बुद्धिर्लज्जा वपुः शान्तिः सिद्धिः कीर्तिस्त्रयोदश ।
ददौ धर्माय पत्न्यर्थं दक्षो हृष्टमना मुने ।।[१७]

नारीणां मध्ये कीर्तिश्च, ह्रीश्च, श्रीश्च, वाक् च अहम् । स्मृतिः मेधा धृतिः क्षमा इति सप्तधर्म्यपत्न्यः अहमेव । यासां लेशयोगेनापि नरः सर्वलोकप्रकाश्यः भवति। ताः कीर्त्यद्याः सत्वस्त्रियः मम विभूतयः इत्यर्थः । अथवा स्त्रीलिङ्गवाचकानां मध्ये कीर्त्यादयः सत्वदेवताः यदर्जनेन लोके श्लाघ्यः भवति ताः मद्विभूतयः ।

१. कीर्तिः – धार्मिकत्वनिमित्ता प्रशस्तत्वेन नानादिग्देशीयसर्वलोकज्ञानविषयतारूपा ख्यातिः । अथवा सद्भिः या गीयते न नट–विटादिभिः सा कीर्तिः ।

२. वाक् – सरस्वती सर्वस्यार्थस्य प्रकाशिका संस्कृता वाणी । यद्वा वाग्वाणी यया सर्वप्राणिनां व्यवहारः चलति सा चतुर्विधा । १. परा, २. पश्यन्ति, ३.मध्यमा, ४. वैखरी च । चत्वारिवाक् परिमिता पदानि इति ऋक् ।[१८] तासां पृथक् स्वरूपं तु

बृहस्पतेः प्रथमं वाचो अग्रम् इति श्रुत्या दर्शितम् । सैषा ?ग्यैव विद्या तपति (मण्डलब्राह्मणम्) । यो वर्णोच्चारहेतोर्घटयति रसनम् इति च द्विधा । १.राष्ट्री, २.मन्द्रा च । तत्र राष्ट्री सम्बद्धात् जाता राष्ट्री देवभाषा इत्यर्थः । मन्द्रा मननगम्या वेदवाणी । यद्वाग्वदन्त्याविचेतनानि श्रुतेः । वाग्वाणी सर्वपदार्थानां प्रकाशिका ।

३. श्रीः – शोभा, श्रीधर्मार्थकामसम्पत् शरीरशोभा वा कान्तिर्वा ।

४. स्मृतिः – चिरानुभूतार्थस्मरणशक्तिः ।

५. मेधा – अनेकग्रन्थार्थधारणाशक्तिः ।

६. धृतिः – अवसादेऽपि शरीरेन्द्रियसङ्घातोत्तम्भनशक्तिः । अथवा देहादिसङ्घातोत्तम्भिका शक्तिः यद्वा उच्छृङ्खलप्रवृत्तिकारणेन चपलप्राप्तौ तन्निवर्तनशक्तिः ।

५. क्षमा – हर्षविषादयोः अविकृतचित्तता यासाम् अभ्यासमात्रसम्बन्धेनापि जनः सर्वलोकादरणीयः भवति । अथवा हर्षविशादयोः अविकृतचित्तता ।

**०५. नागानाम् अनन्तः**

नागाः तेभ्यः सर्पेभ्यः भिन्नजातीयाः अनेकशिरयुक्ताः । तेषां नागानां मध्ये अनन्तः अहमस्मीति भगवतः अभिप्रायः । वैराग्यसत्वगुणविशिष्टः अहमस्मीति भावः ।

बहुशिरसां देशकालगुणानन्त्यहेतुनाऽनन्तनामा शेषनागः अहमस्मीति भावः, तस्मात् नागानां मध्ये अहम् अनन्तः श्रेष्ठः इति सर्वेषाम् अभिमतम् ।

उभयचराः नागाः । एवम् उभयचरत्वात् नागानां श्रेष्ठः अनन्तः ।

नागानाम् अयं स्वभावः यत् ते विषरहिताः भवन्ति । नागानां गणे अनन्तस्य अस्ति वैशिष्ट्यं यत् अनन्तस्य पञ्च फणाः सन्ति । एवं पञ्चत्वं प्रकृतितत्वं द्योतयति । स्वयं भगवान् श्रीवासुदेवः अनन्तशयनो विद्यते । तेन कारणेन वा एषः उपास्यः भवति । भगवता उक्तविभूतिषु द्विधा विभागः कर्तुं शक्यः । एकम्-भौमम् , द्वितीयम् , दिव्यम् ।

तत्र तावत् विभूतयः उपास्यत्वरूपेण निर्दिष्टत्वात् सर्वत्र दिव्या विभूतिरेव ग्राह्या भवति ।

**०६. पक्षीणां वैनतेयः**

भगवान् अवदत् पक्षिणां वैनतेयः इति , अत्र विद्यते बलवती उपपत्तिः । पुराणे एवं श्रूयते महर्षी काश्यपस्य द्वे पत्नी । कद्रूः , विनता इति । उभावपि वरप्रसादेनैव पुत्रान् प्रापुः । कद्रूगर्भात् सर्पकुलस्य जन्म अजायत । विनतायाः गर्भात् द्वौ पुत्रौ जन्म प्रापतुः । तौ अरुण–वैनतेयौ । स च वैनतेयः महान् तेजस्वी, अग्निस्वरूपश्चासीत् । अस्य प्रकाशात् भीताः देवादयः स्वयम् अग्निः स्वजाज्वल्यमानैः किरणैः अस्मान् दहतीति भीत्या अग्निम् उपसर्प्य गोपायतु अस्मान् इति प्रार्थनां चक्रुः ।

तदा अग्निदेवः अवदत् , न तानि मम किरणानि परन्तु तेजस्विनः वैनतेयस्य एव किरणानि इति । एषः सर्पकुलस्य नाशकश्च विद्यते , तदर्थमेव प्राप्तजन्मा । एवं ज्ञातविशयाः

देवाः गरुडम् उपसर्प्य तस्य स्तुतिं चक्रुः ।

त्वमृषिस्त्वं महाभागस्त्वं देवः पतगेश्वरः ।
त्वं प्रभुस्तपनः सूर्यः  परमेष्ठी प्रजापतिः ।।
त्वमिन्द्रस्त्वं हयोमुखस्त्वं शर्वस्त्वं जगत्पतिः ।
त्वं मुखं पद्मजो विप्रस्त्वमग्निः पवनस्तथा ।।
त्वं हि धाता विधाता च त्वं विष्णो सुरसत्तम ।
त्वं महानभिभूः शश्वदमृतं त्वं महद्यषः ।
त्वं प्रभास्त्वमभिप्रेतं त्वं नस्त्राणमनुत्तम ।।
चलन्ति नः खगः हृदयानि चानिशम्  निगृह्यतां वपुरिदग्निसंनिभम् ।
तवद्युतिं कुपितनितान्तसंनिभाम् निशम्य निश्चलति मनोऽव्यवस्थितम् ।।
प्रसीद  नः पतगपते प्रयाचतां शिवश्च नोभगभवन्सुखावहः ।।

एषां श्लोकानाम् अर्थस्तु एवं प्रकारेण विद्यते ......

त्वं मन्त्रदृष्टत्वात् ऋषिरसि , त्वमेव महाभागः, देवपक्षि समूहस्य राजाऽसि । त्वं प्रभुः , त्वमेव तापजनकः , सूर्यश्च । परमेष्ठी प्रजापतिश्च तदंशाः एव । शिवोऽपि भवानेव । त्वं बलवान् चेदपि सात्विकः, साधुश्च । सकलैश्वर्यस्य स्वामिरसि । इत्येवमादिभिः देवैः सम्प्रार्थितत्वात् प्रसन्नः वैनतेयः स्वशरीरगात्रं, स्वतेजोरूपञ्च न्यूनीचकार । वैनतेयः स्वशतृभूतान् एव स्वस्मिन् उपावेश्य  रामणियकद्वीपं  जगाद । तत्र तावत् स्वमातुः वृत्तान्तं पूर्वकालीनं अश्रुणोत् । तेन च कृद्धः वैनतेयः सर्पान् पप्रच्छ ,किन्निमित्तम् एवम् अधर्मकार्यं कृतमिति । तदा सर्पाः ऊचुः, यदि मातुः दास्यभावात् रक्षयितुम् इच्छति तर्हि अस्मभ्यम् अमृतमानय इति आज्ञापयामासुः ।

अमृतस्य आहरणार्थं गतः वैनतेयः स्वबुभुक्षायाः निवारणार्थं सर्वान् निषादान् अचिखादत् । परन्तु न तस्य बुभुक्षायाः निवारणं समभूत् । तदा पित्रा आदिष्टः वैनतेयः कूर्मञ्च गजञ्च आहरत् । एकस्मिन् पादे गजम् , अपरस्मिन् पादे तावत् कूर्मं गृहित्वा डयनकाले एकः वटवृक्षः अवदत् , त्वं मदुपरि उपविष्य बुभुक्षायाः निवारणं कुरुश्वेति । तदा पक्षिराजा वैनतेयः वृक्षे उपविष्टः । तस्य भारं समुद्धर्तुम् असमर्थस्य वृक्षस्य शाखा कर्तिता अभवत् । तस्यां शाखायां वालखिल्यमहर्ष्यः तपाचरणे निमग्नाः आसन्, तेषां तपसः भङ्गः पापजनकः भविष्यतीति स्व चञ्चुना शाखा अगृण्हन् डयते । डयमानम् एनं दृष्ट्वा देवाः एवं स्तुवन्ति .....

गुरुभारं समासाध्योऽपि एष विहङ्गमः ।
गरुडस्तु खगश्रेष्ठस्तस्मात्पन्नग भोजनः।।

एवम् अमृतप्रपित्सुः देवैः सह युद्धं चकार । स्वबलेन देवान् पराजय्य अमृतभाण्डम् आहरत् । एवं महता प्रयासेन मातरं बन्धनात् विमोचयामास । अस्य प्राक्रमं पश्यता विष्णुना एव त्वं मम वाहनत्वेन भवतु इति सूचयति ।  समनीयामृतं मात्रे वैनतेयः समर्पयत् ।[११]

**०७. अश्वानाम् उच्चैश्रवः**

अत्युत्कृष्ट-कृतिमत्वहेतुना उच्चैश्रवेति नाम । अमृतोद्धवं क्षीरसद्रमथनोद्धूतं सप्तमुखम् अश्वम् उच्चैश्रवसं मद्विभूतिं विद्धि इति अर्थेन कृष्णः अवदत् अश्वानां मध्ये उच्चैश्रवाः इति ।

उच्चैः श्रवः यशः यस्य , यद्वा उच्चैः श्रवसी कर्णौ यस्य , यद्वा उच्चैः श्रुणोतीति वा उच्चैःश्रवः ।

कीर्तिरुच्चैश्रवा यस्य सर्वतो वा गिरादिषु ।
रत्नमुच्चैश्रवाः सोत्र हयानां पौरुषाधिपाः ।।[२०]

इन्द्रोघोटके वक्ति उच्चैश्रवः श्वेतवर्णीयः अश्वः इति । उच्चैरुच्चैः श्रवास्तेन हयरन्तमहारि च (कुमारे.२/४७) । एषः उच्चैःश्रवः समुद्रमथनोद्भवः, इन्द्रलोके , देवलोके च चलतीति अस्य वैशिष्ट्यम् । आदिपर्वणि भणितं यत् उच्चौःश्रवस्य वेगं मनसा उपुमिनोति । अर्थात् यथा मनसः वेगः तत्सदृशः वेगः उच्चैःश्रवसीति । एवञ्च एतादृशः श्रेष्ठः अश्वः भगवतः विभूतित्वेन ध्यातव्यः । अप्सु योनिर्वा अश्वः ।[२१]

**०८. गेजेन्द्राणाम् ऐरावतः**

गजेन्द्राणां मध्ये चतुर्दन्तम् गजं समुद्रमथनोद्धूतं मां ऐरावतमिति विद्धि ।

तत ऐरावतो नाम वारुणेन्द्रो विनिर्गतः ।
दन्तश्चतुर्भिः श्चेताद्रेऽन्हरन्भगवतो महिम् ।[२२]

इराः आपः जलानि विद्यते अस्मिन्, इरावान् समुद्रः तत्र भवः ऐरावतः । तेषु अहं श्रेष्ठः ।

प्रावृषेण्यं पयोवाहं विद्युदैरावताविव (रघुवंशम्/२/३६) ।
स तु इन्द्रहस्ति शुक्लपर्णः चतुर्दन्तः समुद्रोत्थितः ।
ऐरावतं दन्तशठमनलं शोणिनापित्तकृत् (सुश्रुतः) ।
बभूव परममश्वानां ऐरावत पथे यथा (म.भा/३/६२/३३) ।
सूर्यमण्डलकपाले द्वे समानीय तु भौवनः ।
सस्ताभ्यां परिगृह्याथ रथन्तरमगायत ।।
साम्नि प्रस्तूयमानेषु सद्य एव गजो भवत् ।
तं प्रायच्छदिरावतै पुगार्थं स तु भौवनः ।।
विरावत्याः सुतो यस्मान्तस्मादैरावतः स्मृतः ।
देवराजोपबह्मत्वात्प्रथमः सः मतङ्गराद् ।।
श्चेताभ्रमाश्चतुर्दन्तः प्रथमः सः मतङ्गराद् ? (अवगीता) ।

**०९. झषाणां मकरः**

कृ -हिंसायाम् इति धातुना उत्पन्नः शब्दः मकरेति । अस्य अर्थस्तु एवं प्रकारेण विद्यते,

कृणातीति मकरः । ततश्च मनुष्याणां करः हिंसकः यद्वा मुखं करोतीति मकरः ।

मकरश्च उभयवासी । पुनश्च जलचरेषु शक्तियुक्तः । यतः सर्वं स्ववशे गृह्णातीति कारणात् । उक्तमेवं मत्स्यानां मकरश्रेष्ठः (हारिते) । अत्र मत्स्य पदेन सर्वे जलचराः ग्राह्याः भवन्ति । एवं तादृश जलचरेषु मत्स्य–कूर्मादिषु मकरः एव श्रेष्ठः । एषां प्राणिनां जैवशक्तिः, तादृशेषु अहमस्मि । यतः मकरस्य कार्यं ग्राहकरूपम् । निर्दिष्टं पञ्चदश्श्यां श्री विद्यारण्यैः – ग्राहग्रासैक कर्मणे इति । सर्वेऽपि जलचराः भूचराश्च एनं दृष्ट्वा विभ्यति । मकरस्य सामर्थ्यं कीदृशमिति गजेन्द्रमोक्षस्य आख्यायिकायां निश्चयेनावगम्यते । स्वयं दृढशाली , बुद्धियुक्तश्च, कुशाग्रमतिः गजेन्द्रोऽपि स्वात्मानं गोपाययितं न शशाक । स्वं आत्मानं रक्षयितुम् असमर्थः विष्णोः स्मरणमकरोत् ।

तदा विष्णुः आदौ तावत् मकरं उद्धरिष्यति । पश्चाच्च गजेब्द्रम् उद्दिधरत् । एवं सामथ्य्र्युक्तानां बलवतानां प्राणिनां समूहे मकरोऽहमिति स्वाशयं वक्ति भगवान् ।

**१०. इन्द्रियाणां मनः**

मन्यते बुध्यते अनेनेति मनः । तदुक्तम् महाभारते ..........

मनो महान् मतिर्बम्हा पूर्णाद्धिख्यातिरीश्वरः ।
प्रज्ञासंविधितश्चैव स्मृतिश्च परिपठ्यते ।।
इमे पर्यायवाचकाः शब्दाः मनसः परिकीर्तिताः ।

मनः इति भगवद्विभूतिषु एकम् । इन्द्रियाणां मनश्चास्मि इति बृवता भगवता किं निमित्तं स्यात् ? इति जिज्ञासायां , तादृशस्य जिज्ञासायाः परिशमनार्थं प्रयत्नः मया अत्र विहितः । तत्रादौ चक्षुरादिषु इन्द्रियेषु मनसः श्रैष्ठ्यत्वं किन्निमित्तम् ? इति चेत् कठोपनिषदि भणितम् .........

आत्मानं रथिनं विद्धि शरीरं रथमेव तु ।
बुद्धिंन्तु सारथिं विद्धि मनः प्रग्रहमेव च ।।[२३]

अत्र प्रतिपादितं यत् मनसः प्रगृहस्थानियत्वम् । अर्थात् मनसा हि प्रगृहीतानि श्रोत्रादीनि सर्वाणि इन्द्रियाणि प्रवर्तन्ते स्वविशयेषु । मनसा नियन्त्रितेनैव श्रोत्रादीनि करणानि प्रवर्तन्ते स्व विशये इत्यर्थः ।

दृश्टान्तं प्रदास्यति श्रुतिः.......... रशनया इव अश्वाः । इति।

यथा रशना एव अश्वं दुर्मार्गे अथवा सन्मार्गे प्रवर्तयितुं कारणं भवति तथा मनैव सर्वेशामिन्द्रियाणां कारणं प्रवृत्तौ निवृतौ च । तदुक्तम्.........मन एव मनुष्याणां कारणं बन्धमोक्षयोः । मनैव मनुश्यस्य हेतुभूतः भवितीति बन्धमोक्षयोः इत्यर्थः । श्री विद्यारण्यैरपि पञ्चदशी ग्रन्थे एवम् उक्तम् ........मनो दशेन्द्रियाध्यक्षं हृत्पद्मगोलके स्थितम् इति ।

ईश्वरकृष्णेन विचारितायां सांख्यकारिकायां मनसः विषये ब्रवीति ..। उभयात्मकं मनः सङ्कल्पकमिन्द्रियञ्च, साधर्म्यात्। गुणपरिणामविशेषान्नानात्वं बाह्यबोधाश्च । भाष्ये ब्रवीति= बुद्धीन्द्रियकर्मेन्द्रियभेदेन देशेन्द्रियाणि व्याख्यातानि । मनसस्तु एकादशकमिन्द्रियम् ।

यतः मनः उभयात्मकम् । बुद्धीन्द्रियेषु बुद्धीन्द्रियवत् , कर्मेन्द्रियेषु कर्मेन्द्रियवत् । यतः मनः इत्येतत् बुद्धीन्द्रियाणां कर्मेन्द्रियाणां च प्रवृत्तिं कल्पयति । तस्माद्धेतोः मनः उभयात्मकं भवति। सङ्कल्पयति स्ङ्कल्पकम् । किञ्चान्यत् इन्द्रियञ्च, साधर्म्यात् समानधर्मभावात्, सात्विकादहङ्कराद्बुद्धीन्द्रियाणि कर्मेन्द्रियाणि मनसा सहोत्पाद्यमानानि मनसः साधर्म्यं प्रति , तस्मात् साधर्म्यात् मनः अपि इन्द्रियम् । गुणाः गुणेषु वर्तन्ते इति ।

एवञ्च न्यायमञ्जर्यां जयभट्टः अवदत् ..... युगपत् ज्ञानानुपतौर्मनसो लिङ्गम् इति । मनो न भौतिकम् । यतः अकार्यत्वात, तस्मादेव हेतोः मनः न तद्गुणयोगि । बाह्येन्द्रियाणि हि मनोधिष्ठितानि स्व विशयेषु प्रवर्तितुम् उअत्सहन्ते चक्षुरादिभिः नान्यथा । एवञ्च ज्ञानेन मनसः श्रैष्ठ्यं ,अतः एकादशसु इन्द्रियेषु मनः श्रेष्ठम् ।

मनस्थं मनमध्यस्थं मध्यस्थं मनवर्जितम् ।<br>
मनसा मनमालोक्य स्वयं सिध्यन्ति योगिनः ।।<br>
वशीकृते मनस्येषां सगुणं ब्रह्मशीलनात् ।<br>
तदेवाविर्भवेत्साक्षादपेतोपाधिकल्पनम् ।।<br>
मनोबुद्धिरहङ्करश्चित्तं क्रणमन्तरम् ।<br>
संशयो निश्चयो गर्वः स्मरणं विषया इमे ।।

एवं केवलेन मनसा निग्रहाग्रहेण ब्रह्मपदमपि प्राप्तुं वा अप्राप्तुं वा शक्यं भवति नैव अन्येषाम् इन्द्रियाणां, तस्मात् इन्द्रियाणां एकादशानां मध्ये मनः अस्मि इति भगवता भणितस्य वचसः प्रामाण्यं विद्यते इति अवगम्यते ।

**११. अक्षराणाम् अकारः**

अक्षराणां वर्णानां मध्ये सर्ववाङ्मयत्वात् श्रेष्ठोऽकारऽहमस्मि इति। अकारो वै सर्वा वाक् सैषा स्पर्शाष्माभिर्व्यज्यमाना बह्वी नानारूपा भवति इति । पुनश्च अकारः आद्यस्वरवर्णः तेन च श्रेष्ठः अकारः । अकारस्य तत्वं निरप्यते ।

श्रृणुतत्वमकारस्य अत्ति गोप्यं वरानने ।<br>
शरच्चन्द्रप्रतीकाशं पञ्चकोणमयं सदा ।।[२४]

यद्वा सर्ववर्णानां मध्ये अकारः प्रथमः । स्वरस्तस्य सर्वत्रानुस्यूतत्वात् स चाऽहम् । अकारो वासुदेवात् अकारः श्रेष्ठः ।

**१२. समासेषु द्वन्द्वः**

द्वन्द्वः समासः उभयपदार्थप्रधानः सामासिकस्य समाससमूहस्य मध्येऽहमस्मि । पूर्वपदार्थप्रधानोऽव्ययी भावाः, उत्तरपदार्थप्रधानः तत्पुरुषः, अन्यपदार्थप्रधानो बहुव्रीहिः इति तेषामुभयपदार्थभावेनापकृष्टत्वात् श्रेष्ठः ।

ननु सममेकत्र आसनं समासे विदुषां व मन्त्रार्थः कृतार्थं वा एकत्रावस्थानं तत्र विदितमर्थजातं सामासिकं चातुर्थिकष्ठक् ठस्येकः इति इकादेशः । यस्येति च इत्यलोपः । तस्य

मध्ये द्वन्द्वः रहस्योहम् । द्वन्द्वं रहस्ये इति सूत्रे द्वन्द्वशब्दस्य रहस्यवाचित्वं शाब्दिकप्रसिद्धमिति भाष्यकारैः कुतो न व्याख्यातमिति चेत्, समासशब्दस्याव्ययीभावादौ द्वन्द्वशब्दस्य द्वन्द्वसमासे च योगरुडेः केवलयोगापेक्षया प्रबलत्वात् ।

प्रकृते च द्वन्द्वशब्दस्य पुंस्त्वेन निर्देशात् । एकत्र रणभूमौ आसनमासोऽवस्थानं तत्र भवं युद्धजातं सामसिकं तस्य मध्ये द्वन्द्वः , इत्यादि यत्किञ्चित् कल्पयितुं शक्यं तस्मादाचार्योक्तमेव गम्यमिति दिक् ।

**१३. विद्यानाम् अध्यात्मविद्या**

विद्यानां श्रेयस्साधनभूतानां मध्ये अध्यात्मविद्या अहमस्मीति भगवदाशयः । आत्मानौ तत्त्वंपदार्थावधिकृत्य या विद्या तत्त्वस्वरूपगुणसम्बन्धवेदनात्मिकाध्यात्मविद्या परमनिश्रेयसयोरुपमिक्षसाधनभूतत्वादतिश्रेष्ठा । ज्ञानहेतवः सर्वे वेदाः शास्त्राणि च तासां मध्ये मोक्षहेतुत्वादध्यात्माविद्या अहमास्मि । विद्यानां चतुर्दशानां मध्ये आत्मप्रतिपादिकाध्यात्मविद्याऽहमस्मि । अन्यासां तु स्वस्वामताभिनिवेशेन मत्सरादिजनकत्वात् । उक्तं च ...........

**रे रे मत्सर जीववत्सरशतं येन त्वया निर्जितम्**
**शास्त्राणामिदमूर्जितं प्रयततां त्वद्वंशविच्छित्तये ।**
**यस्मात्तद्गुरुतामपास्य च कृथाः स्वन्यायुधान्यन्यथा**
**स्वीयं स्थापयितुं मतं परमतच्छेदं कथं कुर्वते।।**

**१४. प्रवदतां वादः**

प्रवदतां प्रकर्षेण वदतां वादिनां सम्बन्धिन्यः या वादजल्पवितण्डात्मिकास्तिस्रः कथाः , तासां मध्ये वादोऽहम् । भूतानामस्मि चेतनेत्यत्र यथा भूतशब्दस्य तत्सम्बन्धिनः परिणामा लक्षितास्तथा इह प्रवद्त्छब्देन तत्सम्बन्धिनः कथाभेदाः लक्ष्यन्ते , अतः निर्धारणोपपत्तिः । यथाश्रुतौ तु उभयत्र अपि षष्ठी । तत्र तत्त्वबुभुत्सोः वीतरागयोः सब्रह्मचारिणोः गुरुशिष्याचार्ययोः वा प्रमाणेन तर्केण च साधनदूषणात्मा - सपक्षप्रतिपक्षपरिग्रहस्तत्त्वनिर्णयपर्यन्तो वादः ।[२५]

तदुक्तम् ...........

प्रमाणातर्कसाधनोपालम्भः सिद्धान्तविरुद्धः पञ्चावयवोपपन्नः पक्षप्रतिपक्षपरिग्रहो वादः।

वादफलस्य तत्त्वनिणऱ्यस्य दुर्दुरूडवादिनिराकरणेन सम्रक्षणार्थं विजिगीषुकथायां जल्पवितण्डे जयापजयमात्रपर्यन्ते । सूचितं यत् .......

तत्त्वाध्यवसायसंसाररक्षणार्थं जल्पवितण्डे बीजप्रोहसंरक्षणार्थे कण्टकशाखाप्रावरणवत् इति । छलजातिनिग्रहस्थानैः परपक्षो दूष्यते इति जल्पे वितण्डायां च समानम् । तत्र वितण्डायां एकेन स्वपक्षः स्थाप्यते एवं अन्येन च दूष्यते एव । जल्पे तु उभाभ्याम् अपि स्वपक्षः स्थाप्यते ,

उभाभ्यां परपक्षो दूष्यते इति विशेषः । उक्तञ्च तत्......
यथोक्तोपपन्नश्छलजातिनिग्रहस्थानसाधनोपलम्भो जल्पः ।[२६]
स प्रतिपक्षस्थापनाहीनो वितण्डा ।[२७]

अतो वितण्डाद्वयशरीरत्वाज्जल्पो नाम नैका कथा किन्तु शक्त्यतिशयज्ञानार्थं समयबन्धमात्रेण प्रवर्तत इति खण्डनकाराः । तत्त्वाध्यवसायपर्यवसायित्वेन तु वादस्य श्रेष्ठत्वमुक्तमेव । वादस्तु वीतरागयोः शिष्याचार्य्योरन्ययोर्वा तत्त्वनिर्णयफलः अतः असौ श्रेष्ठत्वान्मद्विभूतिरित्यर्थः । प्रवदतामित्यनेन वादजल्पवितण्डानां ग्रहणम् । उक्तं गौतमसूत्रे......
प्रमाणतर्कसाधनोपालम्भः सिद्धान्ताविरुद्धः पञ्चावयवोपन्नः पक्षप्रतिपक्षपरिग्रहो वादः । साधनोद्देष्यकोक्तिप्रत्युक्तिरूपवचनसन्दर्भः । पुनश्च अर्थनिर्णयहेतुत्वात् वादस्य श्रेष्ठत्वम् उक्तम् । अतः भगवान् ब्रवीति प्रवदतां वादोऽहमिति ।

**उपसंहारः**

भगवद्विभूतिविस्तरः इति लघुशोधप्रबन्धः वर्तते । गीतायाः विभूतियोगम् आश्रित्य एषः प्रबन्धः रचितः वर्तते । मानवस्य उत्कृष्टत्वप्राप्तये विभूतयः उक्ताः । यदि तेषु उपास्ते तर्हि मानवः चित्तशुद्धिद्वारा परमपदम् आप्नोति ।

एवञ्च आर्षविद्यायाः बृहत् संपत् आधुनिककाले अपि छात्राः अध्ययनं कुर्युः अवगच्छेयुः च । यदि छात्राः अस्माकं संस्कृतसाहित्यस्रोतसं सम्यक् अध्ययनं कुर्वन्ति,तर्हि निश्चयेन भारतस्य विश्वगुरुत्वस्थानं पुनर्प्रतिष्ठापितं भवति। अत्र उक्तानां अपि विभूतीनां अध्ययनेन गीताः नैजं अर्थं अवगम्यते सर्वैः। अतः सर्वैः गीतार्थाः नैजं रहस्यं ज्ञात्वा जगतः कृते दातव्यं स्वात्मनः अपि उत्कृष्टतां प्राप्नुयुः ।

सर्वेभ्यः मङ्गलं भवतु

**सन्दर्भ**


१. भगवद्गीता
२. पञ्चदशी
३. भगवद्गीता १०.७
४. उपन्यासमाला
५. म.अ./४७
६. छा.उ, ३/३/४
७. छा,उ, १/७/२/३
८. गोपथब्राह्मणम् ५/२/४
९. प्र.वि.ब्र. १/५/७

१०. वि.स.ना.
११. सा.वि.भ्रा. १/१/८
१२. छा.उ. २/३/४
१३. छा.उ. २/६/२
१४. बृ.उ. ३/६/४/२०
१५. तै.सं. ३/५/७
१६. रामायणम् , बालकाण्डः
१७. मुद्गलपुराणम्
१८. ऋ. १/१६४/४५
१९. देवीभागवतम् २/१२/२९
२०. स्कन्द पुराण ४/१०/२२
२१. तैस.सं. ५/३/१२
२२. भा/८/८/४
२३. कठोपनिषत्
२४. कामधेनुतन्त्रम्
२५. गौ.ड. २/४२
२६. गौ.का. २/४२
२७. गौ.का. २/४३

पाणिनीया
ISSN-2321-7626
Vol. XXIV, Year VI
विक्रमाब्दः २०७६
ज्येष्ठ-श्रावणमासाङ्कः
मई-जुलाई 2019

# काव्यशास्त्रीयप्रस्थानेषु आचार्यहेमचन्द्रमते काव्यदोषविचारः

नम्रता पटेल्

प्रणम्य परमात्मानं निजं काव्यानुशासनम्।
आचार्यहेमचन्द्रेण विद्वत्प्रीत्यै प्रतन्यते ।।

**काव्यशास्त्रीयप्रस्थानेषु प्रचलितालङ्कारिकाः**

संस्कृतकाव्यशास्त्रं विकासबद्धानां सिद्धान्तानां कोशः विद्यते। काव्यशास्त्रस्य प्रथमः उपलब्धग्रन्थः नाट्यशास्त्रमिति। काव्यशास्त्रिभिः आलङ्कारिकैः काव्यशास्त्रसिद्धान्तानां विकासः नवीनदिशा च सततं प्रदीयते इति विलोक्यते एव। संस्कृतसाहित्ये प्रख्यातारः काव्यशास्त्रिणः कालक्रमानुसारं –

आचार्यभरतः (२ ई.पू. – २ ई. मध्यकालिनः), भामहः (६ ई. मध्यकालिनः), दण्डी (७ ई. उत्तरार्द्धे), वामनः (८–९ ई. मध्यकालिनः), उद्भटः (९ ई. पूर्वार्द्धे), रुद्रटः (९ ई. आरम्भे), आनन्दवर्धनः (९ ई. मध्यकालिनः), रुद्रभटादयः[१] (१०–११ई. मध्यकालिनः), मम्मटाचार्यः (११ ई.उत्तरार्द्धे), हेमचन्द्रः (१२ ई.), रामचन्द्रगुणचन्द्रौ (१२ ई. पूर्वार्द्धे), रुय्याकादयः[२] (१२ ई. मध्यकालिनः), विश्वनाथः (१४ ई. मध्यकालिनः), जगन्नाथः (१७ ई. मध्यकालिनः) अर्वाचीनाश्च।

**काव्यदोषाः**

काव्यदोषाणां चर्चावसरे सर्वदा अन्योन्यसम्बन्धत्वात् गुणचर्चा अपि आयाति। यथा रीत्याः सम्बन्धः गुणैस्साकं वर्तते तथैव गुणानां सम्बन्धः दोषैस्सह। तेनैव कारणेन सदा सर्वदा गुणानां चर्चानन्तरमेव दोषाणामवकाशो भवति। दोषस्य लक्षणं स्वरूपं वा सम्बन्धिता रेखा रच्यते ध्वनिपूर्ववर्ती–ध्वनिपरवर्तिसु च आचार्येषु यतो हि ध्वनिपूर्ववर्तिभिः आचार्यैः दोषसम्बन्धः गुणैस्साकं स्थापितः परवर्तिनिभिश्च रसेन साकं दोषसम्बन्धः गदितः। निष्कर्षतः

गुणः रसस्य नित्यधर्मः, दोषश्च अनित्यधर्मः।

**विविधालङ्कारिकाणां मतानुसारं काव्यदोषाः**

१. आचार्यभरतः – एते दोषास्तु विज्ञेयाः ... एत एव विपर्यास्तु गुणाः।[३]

२. वामनाचार्यः – गुणविपर्ययात्मनो दोषाः।[४]

३. दण्डी – दोषाः विपत्तये तत्र गुणाः सम्पत्तये यथा।[५]

४. मम्मटाचार्यः – मुख्यार्थहतिर्दोषः। हतिरपकर्षकः।[६]

५. आचार्यविश्वनाथः – रसापकर्षकाः दोषाः।[७]

६. हेमचन्द्राचार्यः – रसादेः स्वशब्दोक्तिः क्वचित्संचारिवर्जं दोषः।[८]

तेषामभिमताः काव्यदोषभेदाः संक्षेपेण – भरतसम्मते दश काव्यदोषाः, भामहसम्मते चतुर्विंशतिः, दण्डिसम्मते दश , वामनसम्मते विंशतिः , रुद्रटसम्मते षड्विंशतिः, आनन्दवर्धनसम्मते काव्यदोषतत्त्वानि षड्, महिमभट्टसम्मते पञ्च , मम्मटसम्मते त्रिसप्तति: काव्यदोषाः।

**आलङ्करिकः – आचार्यहेमचन्द्रः**

आचार्यः हेमचन्द्रः श्वेताम्बर–जैनाचार्यः, आलङ्करिकः यः काव्यानुशासनकारश्च। महापण्डितः कलिकालसर्वज्ञः आदि नामभिः तस्य ख्यातिः। तस्य जन्मनाम चङ्गदेव इति, समयश्च ११४५–१२२९, पित्रोः नाम चाचिंग, पाहिणीदेवी च। यदा गुर्जरप्रान्ते सोलङ्कीयवंशीयानां राज्ञां शासनम् आसीत् तदा तेषां केन्द्रं पाटणनगरमासीत्, ते च जैनधर्मानुसर्तारः। तस्मिन्वंशे सिद्धराजजयसिंहो अजायत यस्य गुरुः आचार्य हेमचन्द्रः। हेमचन्द्रस्य रचनासु प्राप्यन्ते विविधविषयकाः यथा दर्शनशास्त्रं योगं व्याकरणं काव्यशास्त्रं वाङ्मयस्य सर्वाण्यपि अङ्गानि।

**ग्रन्थविशेषः – काव्यानुशासनम्**

काव्यानुशासनमिति हेमचन्द्रस्य काव्यशास्त्रीयग्रन्थविशेषः यः काव्यशास्त्रकाराणां श्रेण्यां प्रतिस्थापितः। काव्यानुशासने अष्टौ अध्यायाः, २०८ सूत्राणि च। ग्रन्थस्यास्य त्रयो भागाः –

१. सूत्रम्

२. 'अलङ्कारचूडामणि' नामका व्याख्या

३. 'विवेक' नामका सोदाहरणा वृत्तिश्च।

अलङ्कारचूडामणौ ८०७ उदाहरणानि, विवेके च ८२५ उदाहरणानि प्रस्तुतानि। सम्पूर्णेऽपि ग्रन्थे पञ्चाशत् कवीनां, तथा एकाशीतिः ग्रन्थानाम् च नामोल्लेखः प्राप्यते। काव्यानुशासनं संग्रहग्रन्थः प्रतिभासते यतो हि तत्र सामग्रीः राजशेखरस्य काव्यमीमांसातः, मम्मटस्य काव्यप्रकाशतः, आनन्दवर्धनस्य ध्वन्यालोकतः, अभिनवगुप्तस्य लोचनतः

स्वीकृता।

तथापि हेमचन्द्रः पर्याप्तस्थानेषु तेषां काव्यशास्त्रिणां खण्डनं–मण्डनमपि अकारि। किं बहुना, तत्र हेमचन्द्रस्य शैल्यां सुलभता सुगमता चानुभूयेते। सम्पूर्णकाव्यशास्त्रेषु सुव्यवस्थितः सुरचितश्च प्रबन्धोऽयं, यस्याध्ययनात्परं नान्यग्रन्थाध्ययनावश्यकता विद्यते।

**आचार्यहेमचन्द्रमते काव्यदोषाः**

**काव्यदोषः–** रसादेः स्वशब्दोक्तिः क्वचित्संचारिवर्जं **दोषः**। रसस्थायिव्यभिचारिणां स्वशब्देन शृङ्गारादिना वाभिधानम्।

**अष्टौ रसदोषाः –**

विभावानुभवाक्लेशव्यक्तिः पुनः

पुनर्दीप्त्यकाण्डप्रथाच्छेदाङ्गातिविस्तारराङ्गयननुसंधानानङ्गाभिधानप्रकृतिव्यत्ययाश्च।

१. **रसस्य विभावानुभावक्लेशव्यक्तिः।**

२. **रसस्य पुनः पुनर्दीप्तिः –** रसो हि स्वसामग्रीलब्धः परिपोषः परन्तु वारंवारं परामृष्यमाणेन रसेन परिम्लानकुसुमकल्पः कल्पते। यथा कुमारसम्भवे रतिप्रलापेषु।

३. **अकाण्डे रसस्य प्रथनम् –** अनवसरे रसोत्कर्षः, यथा वेणीसंहारे द्वितीयेऽङ्के।

४. **अकाण्डे रसस्य छेदो –** अनवसरे रसस्य छेदो, यथा वत्सराजस्य रत्नावल्यां चतुर्थेऽङ्के।

५. **अङ्गरसस्य अतिविस्तारम् –**

अङ्गरसः खलु अप्रधानः, तेन किं तस्य विस्तारेण यथा हयग्रीववधे हयग्रीवस्य, इति कृत्वा अङ्गस्यातिविस्तारं हेयम्।

६. **अङ्गिनः अननुसंधानम् –**

प्रधानस्य अङ्गिनः रसस्य विस्मृतिरपि रसदोषः। यथा – रत्नावल्यां चतुर्थेऽङ्के बाभ्रव्यागमनेन सागरिकाया विस्मृतिः। अनुसन्धिः किल सर्वस्वं सहृदयतायाः। यथा तापसवत्सराजे षट्सु अपि अङ्केषु वासवदत्ताविषयः प्रेमसम्बन्धः कथावशात् आशङ्क्यमानविच्छेदः अपि अनुसंहितः।

७. **अनङ्गाभिधानम् –**

अर्थात् अनङ्गस्य रसस्य अनुपकारकस्य वर्णनम् यथा कर्पूरमञ्जर्यां नायिकया खात्मना च वसन्तवर्णनमादृत्य वन्दिवर्णितस्य वसन्तस्य राज्ञा प्रशंसनम्।

८. **रसस्य प्रकृतिव्यत्ययः –**

अत्र प्रकृतिः भवति सप्तधा यथा – दिव्या मानुषी दिव्यमानुषी पातालीया मार्त्यपातालीया दिव्यपातालीया दिव्यमर्त्यपातालीया चेति। वीर–रौद्र–शृङ्गार–शान्त–रसप्रधानाः धीरोदात्त–धीरोद्धत–धीरललित–धीरप्रशान्ताः उत्तममध्यमाधमाश्च। तत्र रति–

हास–शोक–अद्भुतानि मानुषेत्तमप्रकृतिवद् दिव्यादिषु अपि समावेष्टुं शक्यन्ते। परन्तु रतिः सम्भोगशृङ्गाररूपा उत्तमदेवताविषया न वर्णनीया यतो हि तत्तत्र नोचितम्।

**द्वौ पददोषौ –**

**निरर्थकासाधुत्वे पदस्य।**

पदस्य द्वौ दोषौ – निरर्थकत्वम् असाधुत्वम् चेति।

१. **निरर्थकत्वम् –**

यद् मम्मटेन अनर्थकत्वेन पदेन स्वीक्रियते तदेव हेमचन्द्रेण निरर्थकत्वेन पदेन स्वीक्रियते। उदाहरणमपि मम्मटस्यैव स्वीकृतं यथा –

आदावञ्जनपुञ्जलिवपुषां श्वासानलोल्लासित–
प्रोत्सर्पद्विरहानलेन च ततः संतापितानां दृशाम्।
संप्रत्येव निषेकमश्रुपयसा देवस्य चेतोभुवो
भल्लीनामिव पानकर्म कुरुते कामं कुरङ्गेक्षणा।।

परन्तु अग्रे हेमचन्द्राचार्यः कथयति यत् केषाञ्चित् मते निरर्थकमिति न दोषः यथा 'योषितामतितारं' तथा 'बभौ मुखेनाप्रतिभेन'[१७] परन्तु एतादृशः उल्लेखः मम्मटरुद्रटमहिमभट्टादिभिः न कृतः।

२. **असाधुत्वम् –**

शब्दशास्त्रविरोधोऽसाधुत्वम्। यथा –

उन्मज्जन्मकर इवामरापगाया वेगेन प्रतिमुखमेत्य बाणनद्याः।
गाण्डीवी कनकशिलानिभं भुजाभ्यामाजघ्ने विषमविलोचनस्य वक्षः।।

अत्र आजघ्ने इति पदमसाधु। तथा च असाधुत्व दोषस्य नाम च्युतसंस्कृतिदोषत्वेन स्वीकृतम् मम्म्टेन।

**त्रयोदश वाक्यदोषाः**

'विसंधिन्यूनाधिकोक्तास्थानस्थपदपतत्प्रकर्षसमाप्तपुनरात्ताविसर्गहतवृत्तसंकीर्णगर्भितभग्न–प्रक्रमानन्वितत्वानि वाक्यस्य।'

१. **विसन्धित्वम् –**

विश्लेषाद् अश्लीलत्वाद् कष्टत्वाच्च वैरूप्यं विसंधित्वम् । तत्र काव्यानुशासनकारेण संधिः नाम तत्र विश्लेषात् वैरूप्यं यथा – 'कमले इव लोचने इमे अनुबध्नाति विलासपद्धतिः', अश्लीलत्वाद् वैरूप्यं यथा –'विरेचकमिदं नृत्यमाचार्याभासयोजितम्', कष्टत्वाद् वैरूप्यं यथा – 'मञ्जर्युद्गमर्भास्ते गुर्वाभोगा इमा बभुः'।

२. **न्यूनपदत्वम् –** अवश्यवाच्यस्य अनभिधाने न्यूनपदत्वम्। यथा – वेणीसंहारस्य 'तथाभूतां दृष्ट्वा' इत्यस्मिन् पद्ये 'अस्माभिः' 'खिन्ने' चेत्यनयोः शब्दयोः पूर्वं क्रमशः 'इत्थं'

'नोक्तां' चेति पदे न्यूने तेन न्यूनपदत्वदोषः।

३. **अधिकपदत्वम्** – हेमचन्द्राचार्येण अस्य लक्षणं अदत्त्वा उदाहरणं मम्मटस्य ददाति यथा –

स्फटिकाकृतिर्निर्मलः प्रकामं प्रतिसंक्रान्तनिशान्तशास्त्रतत्त्वः।
अनिरुद्धसमन्वितोक्तियुक्तिः प्रतिमल्लास्तमयोदयः स कोऽपि।।

अत्र 'आकृति' इति पदमधिकम्। अस्य चर्चा आचार्येण सुविस्तारं कृतम्।

४. **उक्तपदत्वम्** – मम्मटस्य कथिपदत्वदोषः एव हेमचन्द्रस्य उक्तपदत्वदोषः, तत्रापि तेन स्पष्टीकृतं यत् 'नैकं पदं द्विः प्रयोज्यं प्रायेण' यथा –

'अधिकरतलतल्पं कल्पतश्चापलीलापरिमलननिमीलत्पाण्डिमा गण्डपाली।
सुतनु कथय कस्य व्यञ्जयन्त्यञ्जसैव स्मरमरपतिलीलायौवराज्याभिषेकम् ।।

अत्र 'लीला' पदमुक्तम्। क्वचित्तु लाटानुप्रासे, क्वचित् शब्दशक्तिमूले ध्वनौ, क्वचित् विहितस्य अनुवाद्यत्वे दोषोऽयं गुणः भवतीति आचार्येण सोदाहरणं निर्दिष्टम्।

५. **अस्थानस्थपद** – लक्षणं न दत्त्वा उदाहरणं मम्मटवत् यथा –

प्रियेण संग्रथ्य विपक्षसंनिधौ निवेशितां वक्षसि पीवरस्तने।
स्रजं काचिद्विजहौ जलाविलां वसन्ति हि प्रेम्णि गुणा न वस्तुनि।।

अत्र 'स्रजं काचिन्न जहौ' इति भवेत्।

६. **पतत्प्रकर्षत्वम्** – लक्षणस्य नावश्यकतेति कृत्वा पुनः लक्षणं अदत्त्वा उदाहरणं मम्मटवत् यथा –

कः कः कुत्र न घुर्घुरायितघुरीघोरो घुरेत्सूकरः
कः कः कं कमलाकरं विकमलं कर्तुं करी नोद्यतः।
के के कानि वनान्यरण्यमहिषा नोन्मूलयेयुर्यतः
सिंहीस्नेहविलासबद्धवसतिः पञ्चाननो विद्यते।।

अत्र क्रमात्क्रमम् अनुप्रासो घनयितव्यः परन्तु तन्न भवत्यत्र। क्वचित् पततप्रकर्षत्वं गुणः।

७. **समाप्तपुनरातत्त्वम्** – मम्मटहेमचन्द्रौ लक्षणं न दत्वा समानोदाहरणं दत्तः यथा –

ज्योत्स्नां लिम्पति चन्दनेन स पुमान्सिञ्चत्यसौ मालती–
मालां गण्डजलैर्मूर्धनि कुरुते स्वादून्यसौ फाणितैः।
यस्तस्य प्रथितान्गुणान्प्रथयति श्रीवीरचूडामणे –
स्तारत्वं स च शाणया मृगयते मुक्ताफलानामपि।।

अत्र चूडामणिपदे वाक्यसमाप्ते पुनः तारत्वपदे आरब्धवाक्ये न चमत्कारं सर्जनम्।

